CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 769

Title Trikuti rahasya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 769 Subject: Tantric lit.

Title: Trikūṭārahasya

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.2" by 5.2" Extent: 40 foll.

Language: Sanskrit. Script: Devanagari

Remarks: —

॥श्रीगणेशायनमः॥ ॥श्रीगुरुभ्योनमः॥ ॥श्रीमहात्रिपुरसुंदर्यैनमः॥ देव्युवाच॥ ॥भगवन्
१ देवेतात्वंत्रैलोक्यप्रभुरीश्वरः॥त्रिगुणात्मात्रिलोकेशस्त्रिनेत्रस्त्रिपुरांतक॥१॥त्वमेवसृष्टिकर्त्तात्वं
रक्षाप्रलयक्षमः॥त्वमेवतंत्रसारज्ञः त्वंमंत्राणांनिधिःप्रभुः॥२॥भगवंस्त्वत्प्रसादेनश्रुतस्तंत्रसमु
च्चयः॥इदानींश्रोतुमिच्छामिरहस्यंत्वंनिवेदितं॥३॥श्रीविद्यायामहादेवमहाविद्यासमाश्रितं॥मं
त्रराजपरंतत्वंवदशीघ्रंकृपानिधे॥४॥श्रीभैरव उवाच॥शृणुदेवीप्रवक्ष्यामिरहस्यंसर्वकामिकं
श्रीविद्यायाःपरंतत्वंतंत्रमंत्रैकसागरं॥१॥चतुःषष्ट्यात्मकंतंत्रंरुद्रयामलमीरितं॥तवाज्ञयाप्रव
क्ष्यामिमंत्रमेतन्महेश्वरी॥२॥श्रीत्रिकूटारहस्याख्यंतंत्रमंत्रैकसागरं॥तत्रतेदेवीसंगुह्यमनुक्रमणि
कांपरां॥तंत्रेऽस्मिन्स्तेसमासेनवक्ष्यामिशृणुसादरं॥श्रीमंत्रोद्धारपटलस्त्रिकूटानिर्णयोपरः॥पुर
श्चर्याविधिश्चैवकुलाचारविधिस्तथा॥नित्यकामेश्वरस्यापिमंत्रोद्धारावितिर्णयः॥नित्यपूजावि १
धिश्चैवसुप्रभातार्चनंतथा॥सूर्यस्यैवचचंद्रस्यनूकंयस्यमहेश्वरी॥चैत्रमासिनवम्यांचतथाश्वे

वाश्वमासिके॥कंन्यासंक्रांतिपूजापिस्तंभनादिविधिस्तथा॥पंचदशेश्वरीविद्यादीपदानविधिस्त
था॥शक्तिपूजाविधिश्चैवषोडशपटलस्मृताः॥तंत्रेऽस्मिन्नप्यमंवद्धिकवचानिचषोडश॥वज्र
पंजरकाख्यस्याज्जगन्मिंतामणिस्ततः॥जगन्मंगलकाख्यंचजगन्मोहनकोपरः॥जगदीशःकाम
काख्यस्त्र्यक्षराख्यस्त्रिविक्रमः॥त्रैलोक्यभूषणंनामविरूपाक्षोऽन्निधोपरः॥सर्वार्थसाधकोनाम
सर्वसिद्धिप्रदोपरः॥वैरिनाशाभिधोदेविविजयाख्योविषापहः॥मुक्तिसाधकंचेतिकवचानि
चषोडश॥पटलैःकवचैर्देवियुक्तंषोडशभिःपरं॥तंत्रंगुह्यतमंदेविनप्रकाश्यंकदाचन॥द्वा
त्रिंशत्पटलैर्युक्तंश्रीविद्यायारहस्यकं॥वक्ष्यामिशृणुतंत्रेशानक्तिपूर्वंमहेश्वरी॥श्रीविद्यायामा
हाविद्यात्रिकूटेस्तिविख्यता॥पंचदशेश्वरीदेवीसृष्टिस्थितिलयात्मिका॥विद्याराज्ञीचेतनेतित्रै
लोक्यपरिभूषणा॥तस्यावक्ष्यामितेदेवीमंत्रोद्धारंमहेश्वरी॥येनश्रवणमात्रेणसाधकोमुक्तिभाग्भवेत्
लक्ष्मीःपरामदनवाग्भवशक्तियुक्तातारंचभूतिकामकलाकपितावविद्या॥शक्त्यादिकंतुविपरीत

२ तयाच प्रोक्तं श्रीषोडशाक्षरविधिः सुमनस्कपूर्णः ॥ प्रकारो ॥ श्रीं । ह्रीं क्लीं । ऐं सौः । ॐ ह्रीं श्रीं कएईलह्रीं ।
हसकहलह्रीं । सकलह्रीं । सौः । ऐं क्लीं ह्रीं श्रीं इति मूलमंत्रः । नास्य विघ्नो न वा शौचं कालाकालविविप्र
वः । सिध्यसाध्यारिदोषा वा न वा प्रतिविपर्ययः ॥ साक्षादमृतसाध्योयं सर्वसिद्धिप्रदो मनुः । श्रीवि
द्याया महाराज्ञ्याः कीलितोपि न दोषनाशकः । पूर्ववत्त्रयार्णषट् दीर्घबीजन्यासो विधीयते । करयोर्हृ
दयादीनामंगानां परमेश्वरि ॥ प्रकारो । श्रीं ह्रीं क्लीं एतैः षडंगन्यासः । ध्यानमस्याः प्रवक्ष्यामि सर्व
तंत्रेषु गोपितं । येन ध्यानेन ब्रह्मांडकटाहांतं विलीयते । उद्यत्प्रहेमरुचिरां रविचंद्रवह्निनेत्रां धनुः
शरयुतांकुशकामपाशान् । रम्यैर्भुजैश्च दधतीं शिववक्त्ररूपां कामेश्वरीं हृदि भजामि धृतेंदु
लेखां ॥ १ ॥ इति ध्यानं ॥ अनेन ध्यानमात्रेण ब्रह्मविष्णुहरः प्रिये । शिवो ब्रह्मादयः सुरगणाः जा
तानि स्पंदवक्षुषः ॥ इतीदं पटलं दिव्यं मंत्रोद्धारप्रकाशकं । गुह्यं त्रिपुरसुंदर्या गोपनीयं च गोपये रुद्र २
त् ॥ इति श्रीरुद्रयामले त्रिकूटारहस्ये प्रथमपटलः ॥ श्रीदेव्युवाच ॥ देवदेव महादेव ब्रह्मांग

तवस्मलः । मूलमंत्रस्य मध्ये या श्रीविद्या कथिता त्वया । त्रिकूटेति महाविद्या महापंचदशाक्षरी । तस्या न २
मुद्धारविधिं श्रोतुमिच्छामि तत्त्वतः ॥ भैरव उवाच । अधुना शृणु देवेशि त्रिकूटामंत्रनिर्णयं । स्कृतं गु
प्ततमं देवी न कस्य कथितं मया । हिमाद्रिशिखरे तुंगे कैलासाख्ये तपस्यतः । समजाता पराशक्तिः सृष्टि
२ स्थितिलयात्मिका । तदा स्तोत्रैः परैर्दिव्यैः स्तुता त्रिपुरसुंदरी । प्रादुर्बभूव मे देवी गृहीता गोपिता मया । अ
स्याः कूटत्रयोद्धारं सर्वतंत्रेषु गोपितं । ब्रह्मादिस्तंबपर्यंतं व्याप्तं हि सचराचरं । जगद्ब्रह्मांडकटकं कटाह
कुलकौलिकं । एषां विजानस्रोद्धारं शृणु देवी यथासुखं । तव स्नेहाद्ब्रवीम्यद्य तत्प्रकाश्यं कदाचन । ककारकू
टं प्रथमं शिवाग्निद्वितीयकं । शक्त्याग्निज्ञं तृतीयं स्याद्भुवनत्रयव्यापकं । तत्रादौ ककारकूटोद्धारः । वेधो
बीजमध्ये प्यर्णमधो विष्णुस्तनः पराः । कूटस्थापकं त्वादिः कामेशः कामवर्धनः । प्रकारो । कएईलह्रीं
अनेन सृजते विश्वं महात्रिपुरसुंदरी । ब्रह्मांडादिकटाहांतं जयदं भुवनत्रये । मायाधिरूढ इति मिरं निमिराधि
रूढो विष्णुः स्तषैव चलतामघवाधिरूढा । वसाधिरूढवरुणो स्तयमादिकूटः स्यादिर्नाविष्णुकमला

सैनजप्यमानः॥ क्लीं॥ इतिप्रथमकूटोद्धारः॥ अथद्वितीयकूटोद्धारः॥ छविः शक्तिः शिरःकांतिस्त॥ ईमामाय
षडक्षरः॥ कूटोभुवनेशापकोयं॥ द्वितीयोभुवनःप्रभुः॥ हसकहलह्रीं॥ अनेन पाल्यते देवि बीजं गर्भस्थावर
२ जंगमे॥ ब्रह्मादिस्तंबपर्यंतं महाश्रीषोडशाक्षरी॥ मायारूढतमस्तत्पैवतिमिरारूढाद्ध विस्तसरं कोस
रूढशिरस्ततः परमहोमूर्धाधिरूढाचारतत्राकारूढ छविः सबिंदुमुकुटः कूटोद्वितीयोस्त्ययं स
र्वमाजनजप्यमानइनवद्रमास्पदं संपदो॥ इतिद्वितीयकूटोद्धार॥ २॥ अथतृतीयकूटोद्धारः॥ शक्तिः
शिरस्तमोमायाकूटोयं चतुरक्षरः॥ नृपापकोः महादेवित्रिपुरायास्तृतीयकः॥ सकलह्रीं॥ अनेनै
यतेविश्वं महात्रिपुरसुंदरी॥ ब्रह्मादिकीटप पर्यंतं भुवनत्रयव्यापिनी॥ मायारूढध्वांतबीजं
महत्वीमोहोरूढावरूणीवर्णशक्तिः॥ मूर्धारूढा स्याछरद्विंदुमान्याकूटोस्तीद्रोपप्रसूर्येंदुजाप्यः
प्रकाशो॥ ५॥ ६॥ ७॥ अनयासहव्रीविद्यात्रिकूटाभुवनेश्वरी गोपनीयाप्रयत्नेन चेमात्रापर राम
मेश्वरी॥ क्लीं ह्रीं क्लीं॥ इतित्रिकूटारहस्ये द्वितीयपटलः॥ २॥ भैरवउवाच॥ इदानीं शृणु देवेशि पु ३

रश्चर्याविधिं परं॥ यं विधाय महादेव्या मंत्रः सिद्धिमुपेष्यति॥ शुद्धेह्नि देवि गत्वादौ स्मशाने साधकोत्तमः
गुरुं ध्यात्वा हृदंभोजे देवीं ध्यात्वा च तन्मयीं॥ जप्त्वा बीजत्रयं कूटं विधिवत्साधकोत्तमः॥ गुरवे देवदेवेशि च
समर्प्य जपमादरात्॥ गृहीत्वाज्ञां गुरोः शीघ्रमागत्य जपमंडलं॥ आदौ मंत्रमयं न्यासं कृत्वा मंत्री च प्रा
ङ्मुखः॥ उत्तराभिमुखो वा तु कृत्वा प्राणायामत्रयं चरेत्॥ त्रिरावम्य महादेवी पुरश्चर्याविधिं चरेत्॥ वर्णल
क्षं जपेन्मंत्रं तदर्धं वा महेश्वरि॥ एकलक्षावधि कार्यं नातो न्यूनं कदाचन॥ जीवहीनो यथा देही सर्व
कर्मसु तक्षमः पुरश्चरणहीनो हि न मंत्रः फलदायकः॥ श्मशाने वटमूले च शून्यागारे चतुष्पथे॥
अर्धरात्रे पमध्यान्हे पुरश्चर्यां चरेच्छिवे॥ अपार्धसमयेकृत्वा — — विष्टरं शोधकं उपलक्षणपू
र्वं तु जपं देव्याः समारभेत्॥ कृत्वा षडंगं विधिवद्भूतशुद्धिं ततः परं प्राणान्संस्थाप्य देवेशि मूलमंत्रं
जपेत्ततः॥ जपांते दशांशतो होमस्तद्दशांशेन तर्पणं॥ मार्जनं तद्दशांशेन तद्दशांशेन भोजनं॥ सर्पि
र्नभ्यां उम्हद्विका गुडपुष्पैः प्रसूनकैः॥ पीतैः कार्यं महा[illegible]म पुरश्चरणकर्मणि॥ अथ होमविधिं व

५ दशांशेनमहेश्वरिजपंसमाप्यविधिवद्युतंपरमेपरं।तद्दशांशंचरेद्धोमंसाधकेन्द्रःस्वसिद्धये॥
होमंसंपाद्यश्रीविद्यांतर्पयेत्साधकोत्तमः।त्रिकोणंकुंडमत्रस्तुमग्निवादिकोणतःशिवे।तत्रसलिप्य
संदेवितत्रयंत्रंविभावयेत्।अस्त्रंबिंदुयुतंदेविषट्कोणंवृत्तमंडलं।चतुरस्रांकितंदेविपूजयेत्साध
कोत्तमः।गणेशंधर्मराजंचकुबेरंवरुणंततः।संपूज्यदेविषट्कोणेपूजयेत्सर्वदेवताः।मायांचमोहि
नींचैवहृतीयांचमनोन्मनीमातंगीभुक्तकेशीचमदिराक्षींषडस्रके।बिंदौसंपूजयेद्देवींमहात्रिपु
रसुंदरीं।बिंदौसदाशिवंदेविवह्नौस्वाहायुतंतथा।वर्णसंख्याक्षिपेद्बिंदौस्वर्णस्यपरमेश्वरि।स्व
र्णदिगुणितंरौरेत।रंरंअग्नयेस्वाहामंत्रेणेतिमहेश्वरि॥वह्निमावाह्यपूज्याथत्रिकूटेनाहुति
त्रयंददाददौमहादेविपश्चाद्धोमंसमाचरेत्॥नकदाचित्स्वकुर्वन्तिपुरश्चर्यांस्वयंसुधीः॥
गुरोर्हस्तेनकुर्वन्तिसाधकस्यापिवाशिवे॥ततोन्यांवापुरश्चर्यांस्वयंकुर्याच्चसाधकः॥ततःसि राम
द्धिमवाप्नोतिसाधकोमंत्रसाधकः॥होमंसंपाद्यसंतर्प्यसमार्ज्यमनुनाशिवे॥विप्रांश्चभोजयित्वा ५

देविसृज्यस्वगृहंव्रजेत्॥ इतिश्रीरुद्रयामलेतंत्रेत्रिकूटारहस्येपुरश्चर्याविधिर्नामतृतीयपटलः॥भैरवउ
वाच॥तथाचारंप्रवक्ष्यामिसाधकस्येष्टसिद्धये।गुह्यंपरमगुह्यंचमंत्रादपिसुरेश्वरि।येनमंत्रार्थंतंमद्धा
मंत्रमंत्रस्यभावनां।भवत्साधिनकुर्वन्तिसिद्धिर्नैवभवेद्ध्रुवं।वामाचारःकुलाचारोदक्षिणाचारइत्यपि।त्रयः
कूटाःशिवेख्यातास्तदाचारास्त्रयःस्मृताः।कुलजांपरकीयांवास्वकीयांदेवीकामिनीं।दृष्ट्वानत्वापतास्पृ
ष्ट्वानवेन्मंत्रस्यजापकः।सकृदुच्चारमात्रेणसिद्धयोष्टौभवंतिहि॥श्रीदेव्युवाच॥भगवन्सर्वतत्वज्ञःसर्व
लोकनमस्कृतः॥आचाराणांविधिंब्रूहिश्रीविद्यायामहेश्वर॥भैरवउवाच॥वामाचारंप्रवक्ष्यामिश्री
विद्यासाधनंशिवे॥यंविधायकलौशीघ्रंमांत्रिकसिद्धिभाग्भवेत्।मात्राभूदंतसंभूतपात्रंमानुषमुंड
कं॥आसनंसिंहचर्मादि[illegible]कंकणास्थिकवाद्भवं॥द्रव्यमासवमात्साद्यंभक्ष्यंमांसादिकंशिवे।चर्वणंबा
लमत्स्यादिमुद्राश्वीणारवःकृपाः।मैथुनंपरकांताभिःसर्ववर्णसमाततः।प्रवृत्तेभैरवेतंत्रेसर्वेवर्णाद्वि
जातयः।निवृत्तेभैरवेतंत्रेसर्वेवर्णाःपृथक्पृथक्।वामाचारइतिप्रोक्तःसर्वसिद्धिप्रदाशिवे।नान्यथा

सिद्धिहानिस्यान्मंत्रस्यास्य महेश्वरि। तस्माद्वाममंत्रजे नित्यं वाममार्ग परागतिः। त्रिकूटायाः परं तत्वं वामा
५ चारो मया स्मृतः। दक्षिणं च कुलं चैव साधकैः सिद्धवाहकैः। त्याज्यं दूरात्कलौ देवि वाममेव न जेत्कलौ॥
वक्ष्यामि दक्षिणाचारं कुलाचारं च यावति। कुलाचारं परं पुण्यं सेव्यं योगिजिरुत्तमैः। कुलस्त्रियं कुल
गुरुं कुलदेविं महेश्वरि। नित्यं यः पूजयेद्दिव्यं स कुलाचार उच्यते। कुलस्त्रियं स्त्रियं विज्ञातानत्वानत्वा महे
श्वरि। हठादानीय संपूज्य तया भोगं विधाय च। रेतसा तर्पयेद्देवीं महात्रिपुरसुंदरीं। कामेश्वरीं च वि
धिनाकर्षं कुर्याद्विशेषतः। तत्पूर्वकं चरेद्धोमं कुलकां तां विभूषयेत्। नानालंकरणैर्दिव्यैः स्वर्णैः स्वामीकरैस्त
च। मुक्ताहारैः स्त्रमालैश्च नक्षत्रैर्भोक्ष्यैः सलेह्यकैः। चोष्यपेयैर्महादेवि संतर्प्य कुलयोषितां॥ कुलीनं
साधकश्चैव तथा कुलगुरुं शिवे। प्रत्यक्षदेवतारूपं ध्यात्वा भोगं चरेत्तया। प्रत्यहं वै चरेद्देवं कुलाचार
इति स्मृतः। प्रभाते स्नानसंध्यादि मध्याह्ने जपमीश्वरि। श्रोणिमासनमात्मार्पं निक्षेप्यं वायसत्रार्करा॥ राम ५
माज्जारूढाक्षसंभूतापात्रं याषाणसंभवं। भोगस्वकीयकां तां निदक्षिणाचार इत्ययं। चिरेण फलदः

सिद्धिद्रव्येणमधुनाशिवे। गुरुद्रव्येन वा देवि सिद्धिहानिकरो मतः। इत्याचारपरः श्रीमान्कुलस्त्रीगुरुपूजकः
कामाचारपरो मंत्री मुक्तिभाग्भविता ध्रुवं॥ इति श्रीरुद्रयामले तंत्रे त्रिकूटारहस्ये चतुर्थपटलः॥ श्रीभगवा
नुवाच। अधुना देवि वक्ष्यामि मंत्रोद्धारं महेश्वरी। कामेश्वरस्य श्रीविद्या शिवरूपस्य पार्वति॥ आदौ शिवम
यं विश्वं तथा शक्तिमयं जगत्॥ शिवशक्तिमयं रूपं संपूज्य साधकोत्तमः। यस्तस्मै पूजयेच्छक्तिं शिवं
नैव प्रपूजयेत्। स एव पातकी रोगी मांत्रिको दुर्गतिः पदं। जन्मकोटिषु जप्त्वापि मंत्रमेकं च शाक्तिकं॥
शैवं वा परमेशानि न कदाचिन्नवेच्छिवं॥ तस्मान्मंत्रं जपेद्देवि शिवशक्त्योर्विशेषतः। नान्यथा सिद्धिहानि
स्यान्ममापि परमेश्वरि। कालिकाया महाकालः सुमुख्याश्च महेश्वरः। कामेश्वरत्रिकूटाया शिव एव मुच्य
ते। तस्मात्कामेश्वरस्याहं मंत्रोद्धारं ब्रवीमि ते। पंचधा मांत्रिकः शीघ्रं सर्वसिद्धियुतो भवेत्। वाग्भवं मदन
शक्तितारकामापराः सकलविद्यायां चिताः। तारयुक्ता विपरीतबीजकाः षोडशाक्षरविधिः श्रुतः स्मृतः॥
१ प्रकारः। ऐं क्लीं सौं। ॐ श्रीं ह्रीं। ॐ ऐं क्लीं सौं। ॐ श्रीं ह्रीं हसक्षमलवरयूं सह। पादुकापंचदशाक्षरी वा

६ पंचदशीयं। क्ष्मलवरफं यरलवक्ष्मलवरयफं। ॐ ह्रीं श्रीं। ॐ सौः क्लीं ऐं। ॐ ह्रीं श्रीं। ॐ सौः क्लीं ऐं। इतिकामे
श्वरमंत्रोद्धारः। श्रीदेव्युवाच॥ भगवन्श्रोतुमिच्छामित्रिकूटोद्धारनिर्णयं। वक्तुमर्हसिमेदेवयद्यस्तिमयि
तेदया। श्रीभैरवउवाच। त्रिकूटोद्धारमीशास्यनित्यस्यशृणुभामिनी। कामेश्वरस्यकामंचगोपनीयंप्र
यत्नतः। कांतिःशरन्निर्जराणांदुलिमोहार्णवेरूपकौ। मंत्रांतेरेकेशाबीजंस्यादादिकूटयमीरितः। प्रका
शं। हसक्षमलयऊं। केशारूढोहिवीरस्तदनुगिरिसुतेवैरूपकारूढमोहं मोहारूढाहिभेकीसुरगण
नमितेदिंदुरारूढदेवादेवारूढाशारदेशाशिरविनयनेशक्तिकारूढ कांतिःकूटोयंमादिराख्यो
हरिहरत्रिदशेशानभ्रम्रःशिवस्य च। इतिद्वारं। प्रकाशं। हसक्षमलवरयूं इति प्रथमकूटोद्धारः॥
शक्तिकांतिःसुरोभेकीध्वांतजीमूलवनहयः। वायुकोशोद्वितीयोयेकूटराजोनवाक्षरः। इत्युद्धारः
सहक्षमलवरयऊं। केशारूढोत्रवायुस्तदधिगतमहोवह्निरेतन्निविष्टोजीमूतस्तऊर्ध्वःस्यात्रिगि राम
रमुपरितस्तस्यमद्रुकबीजं। भेकारूढोत्रदेवस्तदुपरिसुषुम्नाचैवकांताधिरूढाशक्तिःकूटोयम ६

न्तःसकलसुरकुलैर्जप्यमानःशिवस्य॥ इतिद्वितीयकूटोद्धारः। वायुर्वह्निस्तमोप्यन्नदेवभेस्वर्णः
वायवः। सकाचानित्यदेवस्यकूटोयंस्यात्तृतीयकः। इत्युद्धारः। प्रकाशं। यरलवक्षमयहुं॥ केशा
रूढोस्तिवायुस्तदनुगिरिसुतेवीरकारूढभेकीभेकारूढोपिदेवस्तदुपरिघनकंतत्स्थितंध्वांत
बीजं। मोहारूढोपिवह्निस्तदुपरिगिरिजेवायुराधेश्वरस्यकूटोयंस्यात्तृतीयःत्रिभुवनजनन
स्यात्संहारकारः। प्रकाशं॥ इतितृतीयकूटोद्धारः। चतुर्विंशाक्षरिविद्यात्रिकूटाकामदाप
राः। कामेश्वरस्यदेवेशिगोपनीयाप्रयत्नतः॥ इतिरुद्रयामलेतंत्रेत्रिकूटारहस्येपंचमःप
टलः॥ भैरवउवाच॥ अधुनादेविवक्ष्यामिपूजापटलमीश्वरी। श्रीदेव्याःषोडशाक्षर्याःपू
जांमानसिकींचरेत्। मृतकेसूतकेवापिपथिकांतारमंडले। क्लेशदुःखेचकारायांसंकटे
रणमंडले। मनसैवचरेत्पूजांत्रिकूटायामहेश्वरि। शृणुत्वंभक्तिभावेनयथावद्गदितंम
या॥ उत्थायपरायनादेविब्राह्मेदिनेमुहूर्त्तके। प्रक्षाल्यमुखहस्तांघ्रीमाचम्यत्रिमहेश्वरी।

णायामत्रयंकृत्वागुरुंध्यात्वासदाशिवकं।देवींकामेश्वरांकोयविष्टांकामेश्वरींस्मरेत्।ध्यात्वापूर्वार्णेष ७
ट्दीर्घोन्यासंकृत्वायथाविधि।जपेन्मूलंचगायत्रींगुर्वेतत्समर्पयेत्।आगत्यबहिरोंकारंजपन्ना
रण्यचूल्मिषु।तत्रामूत्रादिसंत्यज्यवर्णाक्लिंशौचमाचरेत्।रमाबीजेनसंशोध्यदंतान्साधकसत्तमः
मायाबीजेनगंडूषत्रयंकुर्यान्महेश्वरि।मूलेनदेवितीर्थानितदावाह्यस्वसिद्धये।ॐगंगेचयमुनेचैव
वगोदावरीसरस्वती।नर्मदेसिंधुकावेरिजलेस्मिन्संनिधिंकुरु।इत्यावाह्यमहादेविमावाहयेत्ततः
मूलेनत्रिःसमुत्सृज्यनघंनसिमहेश्वरि।ततोमूलंजपेन्मंत्रीगायत्रींचविशेषतः सूर्यायार्घत्रयं
दद्याद्देवदेव्योस्तर्पयेवच।त्रिपुरेदेविविद्महेआदिकूटसमन्विते कामेश्वरीधीमहीचद्वितीयकू
टपूर्वंचतन्नक्लिंप्रचोदयात्।इतिगायत्र्युद्धारः प्रकारो | त्रिपुरेदेविविद्महे | कामेश्वरिधीम
हि | तन्नः क्लीन्नप्रचोदयात् जलादारुह्यवासो | साधकः ।संध्यां | तुमनसाकृत्वाचा
घमर्षणपूर्वकं संध्यांनिर्वर्त्यदेवेशियागगेहंततःकृ | ततोव्रजेत्॥तत्रद्वारार्चनंकृत्वाकुर्याद्वा राम. ७
सिपरिधायच॥ला

सनशोधनं कृतशुद्धिंततःकृत्वाप्राणायामविधिंततः।षोडशान्यासयोगेन देहेदेवत्वयंचरेत्।मनसाव
र्णिनागोत्थंश्रीचक्रंतत्रभावयेत् बिंदुत्रिकोणदशारयुग्मंमन्वस्रनागदलसंगतषोडशारं वृत्तत्रयं
चधरणीसदनत्रयंचश्रीच[illegible]मेतदुदितंपरदेवतायाः।इतिमंत्रोद्धारः।विभाव्यतत्रश्रीचक्रंहृ
दयेसाधकोत्तमः।योगपीठंततोभ्यर्च्यहंक्षंयंरंलंवंइतिबिंदौ।कामेश्वरांकोयविष्टांकामेश्वरीं
स्मरेत्।पात्राणिस्थापयेत्तत्रत्रिकोणजलनिर्मिते।चतुरस्रमंडलंचविधायगंधकाबुभिःअ
स्त्रायफडितिवसंस्थाप्यात्रिपादिकोतत्रास्त्रक्षालयेच्छंखंसमभ्यर्च्यतथासुधिः।तत्रार्कमंडलंदे
वीसोमवह्न्यग्निमंडलं संपूज्यमूलमंत्रेण।कलास्तेषांसपर्चयेत्।मूलाष्टमंत्रितंदेवीविधायती
र्थवारिच मेनापूर्यशिवेशंखंशंखमुद्रांनिवेद्यच।तीर्थमावाह्यदेवेशिशुद्धंतत्रैवभावयेत्।सामा
न्यार्घ्यस्यवामेतुशोधितंकलशंशिवे।अस्त्रंचैवषडस्रंचवृत्तंतूर्याश्रमंडलं।पुष्पाक्षतैःसमा
भ्यर्च्यतत्रकूटत्रयेणच षडंगन्यासयोगेनसमभ्यर्च्यषडक्षरं चतुरस्रंसमभ्यर्च्यसंस्थाप्यात्रा

त्रिपादिकां। कलासूर्येंदुवह्नीनां सममर्चयथाविधि। कलत्रोसि महादेवी देवीसं पूयेत्सुरां। आनंदभैर
८ वं चैव देवकूटत्रयेण तु। मायारमाकामबीजं धेनुमुद्रां प्रदापयेत्। मत्स्यमुद्रादिना [illegible] सामान्यार्घ्य
स्य दक्षिणे। कलशाहिं मंडलं चविधायास्मं महेश्वरि। शांतिपात्रं समादाय मूलेनाशानि मंत्रिकं॥
तत्रैव प्रोक्षणीपात्रं तथा बटुकपात्रकं। गुरुपात्रादिषु स्थाप्य तीर्थेन्नारवादखेप्यधः। पंक्त्याकारे
ण देवेशि पात्राणि स्थापयेत्ततः पाद्यार्घ्यमधुपंचमनीय पात्रपूजनं। विधाय तत्रश्री देव्यान्यासं
षडंगपूर्वकं। मणिपूरे ब्रह्मरंध्रे मूलाधारादिके शिवे। शिववक्त्रोसामरस्यं विज्ञाय साधकेश्वरः
ततः कामाः कलारूपस्त्रिपुरिकृतविग्रहः। शिववक्त्रां कौपादुकां चतर्पयामि नमइति। सप्रधा देवी
संतर्प्य ततः कूटत्रयेण च सर्वज्ञतारकाद्याः पूजनीयाश्चतर्पणैः। संतर्पयेद्गुरून्स्तत्रदिव्यौघादीन्
महेश्वरि॥ पराशक्तियुता पूज्या स्तीर्णांबा तां महेश्वरी। तत्त्रयेणवाचम्प्य त्रिवारावत्तवेत्स्वयं। श्रीच राम·
क्रे देवदेवोस्य रूपं ध्यात्वा त्रिवर्णकं॥ स्थापनं संनिधानं च संमुखीकरणं शिवे। मुद्राभिः साधकः ८

कृत्वा देवीस्वरूपाय मायया। देव्यै देवाय मूलेन प्राणान्दत्वा महेश्वरि। शिववक्त्रोपरं रूपं ध्यात्वा पूजां समा
रभेत्॥ तत्रादौ देवोदेव्योश्च पाद्यार्घ्यादीनि वेदयेत्। मधुपर्कं निवेद्यापि निवेद्याचमनीयकं॥ ना
नालंकारवस्त्राणि निवेद्य साधकोत्तमः। नैवेद्याचमनीयादि शिववक्त्रे निवेदयेत्॥ धूपदी
पादीसंज्ञाव्यपरमान्नं निवेद्य च॥ तांबूलं च मुखे दत्वा हृष्ट्वा द्याश्चतर्पयेत्॥ पुष्पांजलि
श्च श्रीचक्रे दत्वा पूजां समारभेत्॥ आदौ कामेश्वरीं नित्यां पूजयेद्भगमालिनीं। नित्यक्लि
न्नां च संपूज्य नीरूंडां च महेश्वरी। श्रीवह्निवासिनीं नित्यां महाविद्येश्वरीं ततः। शिवदूतीं महे
शानी त्वरितां पूजयेत्तमः। श्रीकुलसुंदरीं नित्यां नित्यां नित्यां ततः परं। ततो नीलपताकां च
विजयां च महेश्वरी। श्रीसर्वमंगलां नित्यां ज्वालामालां ततः परं। चित्रां नित्यां महेशानि त्रिक
ां पूजयेच्छिवे। पुनः पुष्पांजलिं दत्वा श्रीविद्याष्टष्टनामके गुरुपंक्तित्रये पूज्यां तर्पणीयाश्च
कृत्पक। गुरुपूजां विधायाथ त्रिपुरां पूजयेत्ततः। त्रिपुरां पूजयाम्यद्य तर्पयामि नमः

८

तेनत्रादौ पूजयेद्देविं ऐं क्लीं सौः त्रिपुरेश्वरि। त्रिपुरसुंदरी देवी ततः त्रिपुरवासिनी। त्रिपुरां पूजये
न्मंत्रिणी ऐं क्लीं त्रिपुरमालिनी। ह्रीं श्रीं सौः त्रिपुरासिद्धां पूजयेत्रिपुरांबिकां। पूजयेन्मांत्रिको मंत्री
महात्रिपुरभैरवी॥ इति श्रीचतुरस्रादिवेद्वारेषु पूजयेत्। तत्र चक्रेषु देवेशि तत्र चक्रेश्वरी
पुनः। पूजनीयाश्च योगिन्यो वामावर्त्तेन पार्वति। अणिमाद्यास्तथासिद्धिः पूजयेत्साधको
त्तमः। ब्राह्म्याद्यामातरः पूज्याः रेखासु परमेश्वरि। सर्वसंक्षोभिणी मुद्रा नवमुद्राश्च पूज
येत्॥ ततो मूलेन श्रीविद्यां संतर्प्य परमेश्वरि। पुष्पांजलिं च श्रीचक्रे दत्वाद्यष्टदले चर्चये
त्। सर्वाशापूरकापात्रश्रीचक्राय महेश्वरि। दद्यात्पुष्पांजलिं दिव्यं ततः संपूजयेच्छिवां।
क्लीं श्रीं कामाकर्षिणी चति सौक ख्यापदोचितां॥ अं अरं बुध्याकर्षिणी च तथाहंकारकर्षि
णी। इं शब्दाकर्षिणी नित्यां तथा ई स्पर्शाकर्षिणी॥ ऊ रूपाकर्षिणी नित्यां तं चित्ताकर्षिणी
तथा॥ ल्दं धैर्याकर्षिणी नित्यां एं स्मृत्याकर्षिणी तथा॥ तं नामाकर्षिणी नित्यां बीजाकर्षिणी तथा राम· ८

औं आत्मकर्षिणी नित्याममृताकर्षिणी तथा॥ अशरीराकर्षिणी च षोडशारेषु पूजयेत्॥ मूल
देवीं महादेवीं संतर्प्य साधकोत्तमः सर्वसंक्षोभके चक्रे दत्वा पुष्पांजलिं पुनः॥ अनंगकुसु
मा देवि अनंगमदनातुरा। संपूज्यानंगरेखा च संपूज्यानंगमेखला॥ अनंगांकुशा संपू
ज्या संपूज्य संपूज्यानंगमालिनी। संपूज्याष्टदले देवी मूलदेवीं च तर्पयेत्। शिवशक्तिसाध
केशः प्रणमेद्योनिमुद्रया॥ इत्येतच्चक्रत्रितयं ध्यायेच्चैव स्वरूपकं। सर्वसौभाग्यदायात्र
श्रीचक्राय महेश्वरि। दत्वा पुष्पांजलिं मंत्री पूजयेत्साधकोत्तमः सर्वसंक्षोभिणी शक्तिः सर्ववि
द्राविणी ततः। श्रीसर्वाकर्षिणी शक्तिः सर्वाह्लाद
नकारिणी। सर्वार्थसाधनी शक्तिः सर्वसंपत्प्रपूरणी। सर्वसंमोहिनी शक्तिः सर्वस्तंभ
री संपूज्य साधकैरेता वामावर्त्तेन पार्वति। सर्वमंत्रमयी शक्तिः सर्वद्वंद्वक्षयंक
सांद्दकायाप्य चक्राय साधकोत्तमः। कामेश्वरी च संतर्प्य प्रणमेद्योनिमुद्रया सर्वार्थ
पुष्पांजलिं ततो दद्यात्पूजयेत्सिद्धिदेवता। सर्वसिद्धिप्रदा

१० देवि सर्वसंपत्प्रदा ततः। सर्वप्रियंकरी देवी सर्वमंगलकारिणी। सर्वकामप्रदा देवी दुःखविमोचि-
नी सर्वमृत्युप्रशमिनी सर्वविघ्ननिवारिणी। सर्वांगसुंदरी देवी सर्वसौभाग्यदायिनी। गंधाक्ष-
तैः समभ्यर्च्य तर्पयित्वा मूलदेवतां। कामेश्वरीं च देवेशि। प्रणमेद्योनिमुद्रया। सर्वरक्षाकराया
न्नचक्रासुरवंदिते। दत्वा पुष्पांजलिं देवीं पूजयेत्साधकोत्तमः। ह्रीं श्रीं सर्वज्ञा देवि सर्वशक्ति-
स्ततः परं। सर्वैश्वर्यप्रदा देवि सर्वज्ञानमयी ततः। ततः संपूजनीया च सर्वव्याधिविनाशिनी
सर्वाधारस्वरूपा च सर्वपापहरा ततः। सर्वानंदमयी देवी सर्वरक्षास्वरूपिणी। महादेवि
महादेवी सर्वेप्सितफलप्रदाः। इति गंधाक्षतैः पूज्या मूलदेवीं च तर्पयेत्। संतर्प्य सन्नि-
वां देवीं प्रणमेद्योनिमुद्रया। एतद्द्वितीयचक्रं तु सूर्यरूपे स्मरेद्धृदि। सर्वरोगहरायात्र
चक्राय नवरूपिणि। दत्वा पुष्पांजलिं देवीं पूजयेद्देवताष्टकं। वशिनी वाग्देवता दौ कामेश्व- एम.
री तत शिवे। मोदिनी वाग्देवता च विमला पापहरणा ततः। जयिनी वाग्देवता च पूज्या सर्वेश्वरी त- १०

तः। कौलिनी वाग्देवता च पूज्यास्तास्तर्पयाम्यहं। गंधाक्षतप्रसूनाद्यैर्मूलदेवीं च तर्पयेत्। समा-
त्रिक्रमवामेन प्रणमेद्योनिमुद्रया। वाग्देवताष्टकं पूज्य रक्तपुष्पैर्विशेषतः। ॐ अंतिराजचक्रा-
य दत्वा पुष्पांजलिं ततः। दक्षाधोहस्तकमले देव्यायुधवितेमं नागके। जृंभिणी कामबाणा दौ वा-
माधोहस्तनागके। मोहनं कामधेनुश्च दक्षिणे देवीत तु परे। वशीकारं कामपाशं कामांकुशं
च स्तंभनं। चतुर्षु करपद्मेषु पूजयेदायुधानि तु। सर्वसिद्धिप्रदायात्र श्रीचक्राय महेश्वरि। द-
त्वा पुष्पांजलिं पूजामारभेत्साधकोत्तमः। कामेश्वरी वज्रेश्वरी पूजयेद्भगमालिनी। कूटत्रये-
ण देवेशि त्रिकोणे साधकोत्तमः। इति संपूज्य संतर्प्य मूलेन मूलदेवतां। सर्वानंदमयायत्र
श्रीचक्राय सुबिंदवे। दद्यात्पुष्पांजलिं देवि साधकः सर्वसिद्धये। मूलविद्यां समुच्चार्य सप्र-
वारं महेश्वरि। पूजयेत्साधको नत्वा महात्रिपुरसुंदरी। इति संपूज्य संतर्प्य गंधाक्षत-
प्रसूनकैः। धूपदीपादिनिश्चैव नैवेद्यैश्च महत्तरैः। तथा श्रीबटुकायापि दद्याद्बलिं मनु-

त्तमं योगिनीभ्यो बलिं दत्वा क्षेत्रपालाय वै ततः ॥ विघ्नकृद्भ्यश्च भूतेभ्यो दत्वा बलिमनुत्तमं दत्वा
देव्यै पुनर्देवि नैवेद्याचमनीयकं ॥ तांबूलछत्रचामरारात्रिकादीन्निवेदयेत् ॥ संक्षोभद्रावणा
कृष्टिवश्योन्मादमहांकुशाः ॥ खेचरीबीजयोन्याख्या नवमुद्राः प्रदर्शयेत् ॥ सौभाग्यबीज
न्यासेन स्वदेहं व्यापयेच्छिवे ॥ देव्यग्रे च जपं कुर्यात्साढं कुर्यात्तत्परं ॥ वर्मसहस्रनाम्नोतु
स्तोत्रराजस्य पार्वति ॥ शिवशक्त्यो महादेवि जपं तत्र समर्पयेत् ॥ गुह्यातिगुह्यगोप्ता त्वं गृहा
णास्मत्कृतं जपं ॥ सिद्धिं न विसर्जयेत्प्रातप्रभृति सायांतं सायादिप्रातरंततः ॥ सत्करोमि ज
गन्मातस्तदस्तु तव पूजनं ॥ संहारमुद्रया देवि देवदेवौ विसृज्य च ॥ स्वयं सदाशिवो भूत्वा शि
वशक्तिस्वरूपकः ॥ त्रैलोक्यां साधको देवि सुखं च विहरेदिति ॥ पूजापटलमेतं वै गुह्यं मम रह
स्यकं ॥ रक्षस्व विधिवद्देवि गोपनीयं स्वयोनिवत् ॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये षष्ट
पटलः ॥ श्रीभैरव उवाच ॥ अधुना कथयाम्यद्य पूजां सामयिकीं शृणु ॥ येन श्रवणमात्रेण

कोटीपूजाफलं भवेत् ॥ श्रीदेव्याः षोडशार्णस्य त्रिकूटा— समर्चनं ॥ समयस्य प्रवक्ष्यामि भ
क्तिपूर्वं शृणु प्रिये ॥ विना समयदीक्षाद्यैर्मंत्रैर्दीक्षापि निष्फला तस्मात्समयपूजां ते वक्षा
मि पारलौकिकीं ॥ न सिध्यंति महादेवि नित्यपूजाजपादयः ॥ यज्ञाहोमादयो देवि विना स
मयपूजनात् ॥ अष्टोत्तरशतं प्रख्याः समयाः संति पार्वति ॥ येषु यः पूजयेद्देवीं महात्रिपुरसुं
दरीं ॥ येषामपि महादेवि समयाः संति चोत्तमाः ॥ सूर्यग्रहणकालो वा चंद्रग्रहणवासरः ॥ भूकंपसम
यो देवि नवरात्रिदिनानि तु ॥ कन्यासंक्रांतिसमयाः देवानामपि दुर्लभाः ॥ एतेषु समयेष्वेवं यः शिवां
पूजयेच्छिवे ॥ स साक्षाद्भैरवो ज्ञेयो वरदानक्षमः शिवः ॥ तत्रादौ पूजनं वक्ष्ये सूर्यग्रहणपूर्वकं ॥
यस्मिन्काले न वेद्राहुस्सूर्ययोश्च समागमः ॥ तदैव साधकः स्नात्वा पूजां सामयिकीं चरेत् ॥ स्ना
त्वा विलिख्य धरणीं भूमौ यंत्रं लिखेच्छिवे ॥ सिंदूरेण महादेवि सर्वाशापरिपूरकं ॥ त्रिकोणं बिंदु
संयुक्तमष्टकोणं महेश्वरि ॥ वृत्तमष्टदलं देवि भूगृहेण प्रशोभितं ॥ विनाप्ययंत्रं देवेशि पूजां

मंत्रिसमारभेत्। आसनं देवि संशोध्य च तत्शुद्धिं विधाय च। प्राणान् समर्प्य मासेऽस्थ देहं आप्य
महेश्वरी॥ ॥श्रीं ह्रीं क्लीं ऐं सौः मंत्रेण पूजां कुर्याद्धि मांत्रिकः॥ सर्वाशापूरकायादौ श्रीचक्राय
१२ महेष्टिकृत्। दत्वा पुष्पांजलिं देवि चतुरस्रं समर्चयेत्। सूर्यग्रहणपूजायां॥ ऋषिः प्रोक्तः
सदाशिवः। पंक्तिश्छंदः समाख्यातं त्रिकूटा देवतेरिता॥ ऐं बीजं सौः स्तथा शक्तिः क्लीं कीलक
मुद्राहृतं। सर्वार्थकाममोक्षार्थे विनियोगप्रकीर्तितः॥ पूर्वसंकल्पमूलेन गणेशं धर्मराजकं॥
वरुणं च कुबेरं च पूजयेच्चतुरस्रके। करालं विकरालं च संहाररूरुभैरवं। महाकालं च काला
ग्निं सुप्रमुन्मत्तभैरवं। अष्टपत्रेषु देवेशि पूजयेद्गंधपुष्पकैः। वशिनी वाग्देवता च कामेश्व
री ततः परं॥ मोदिनी वाग्देवता च विमला प्रूणा ततः॥ जयिनी वाग्देवता च पूज्या सर्वेश्वा
री ततः॥ कौलिनी वाग्देवता [illegible]पि पूजनीयाष्टकोणके। गंधाक्षतप्रसूनाद्यैर्वामावर्तेन पूज राम॰
येत्॥ पीतपुष्पैर्महादेवी पयसा मधुनार्चयेत्। गंगा च यमुना चैव सरस्वत्यपि पार्वति॥ त्रि १२

कोणे त्रातक्रमतः पूजनीया च साधकैः॥ नीलपुष्पैश्च दध्ना च घृतमत्स्याडपक्वकैः॥ बिंदावानंदपक्षे तु
श्रीविद्यां परमेश्वरीं। त्रिकूटां त्रिपुरेशानीं महात्रिपुरसुंदरीं। कामेश्वरीं नंदिरूढं भैरवं भैरवेश्वरं। तत्रोपरि
महाविद्यां मूलेन षोडशाक्षरीं॥ ॐ ह्रीं श्रीं रां राहवे फट् स्वाहा मंत्रेण साधकः॥ बिंदुं संपूजयेद्राहुं
त्रिवारं च ससक्तिकं। तत्रैव पूजयेद्देवि श्रीसूर्यग्रहनायकं। ह्रीं हंसः सः श्रीसूर्याय नम इति त्रिवारतः
गंधाक्षतप्रसूनाद्यैर्धूपदीपादितर्पणैः॥ नैवेद्याचमनीयाद्यैस्तांबूलैश्च सुवासितैः॥ तत्रोप
रि महेशानि दद्यान्मूलेन साधकः। रौप्यस्य च सुवर्णस्य रतीका दद्यात् पार्वति॥ पीतवस्त्रं महादेवी
ताम्रस्य चतुष्कादद्याः॥ दत्वा यंत्रस्य पुरतो जपं कुर्यात् महेश्वरि॥ अयुतार्द्धं तदर्द्धं वा सहस्रैकं च वा जपे
त्। जयाद्दशांशतो होमः कार्यः सर्पिर्यवातिलैः॥ तदग्रे कवचस्तोत्रनाम्नां सहस्रकस्य च॥
पाठं कुर्यात्ततो देव्यै सन्निधायै समर्चयेत्। राहवे कुजसूर्याय गुरवे साधकोत्तमः जपं समर्प्य वि
धिवल्लत्वा साष्टांग नमीश्वरि॥ विसर्जयेन्महाविद्यां महासंहारमुद्रया॥ यंत्रार्चनं विधायाथ ब्रा

ग्रहणाय महेश्वरि। दक्षिणं परमानंद वास्वयं भूयात्सदाशिवः। य एनं पूजयेद्देवी त्रिकूटां षोडशा
१३ क्षरीं ग्रहणे ग्रहनाथस्य सूर्यस्यामिततेजसः। कोटीवर्षसहस्राणां पूजाया फलमाप्नुयात्॥
इंद्रो विष्णुर्हरो वायुर्गणेशो वरुणो यमः। अनया पूजया देवि जाताः सर्वे दिगीश्वराः। नित्यपूजा
सहस्रस्य तपाकोटीजयस्य च। अनया पूजया सद्यः फलमाप्नोति साधकः। सूर्यग्रहणपूजायाः
श्रीविद्यापटलस्स्मृतः। गोपनीयः प्रयत्नेन साधकेन स्वसिद्धये॥ ॥ इति रुद्रयामले तंत्रे त्रिकूट
रहस्ये सप्तमपटलः॥ भैरव उवाच॥ शृणुष्वावहिता त्वां कथयामि महेश्वरि। त्रिकूटायाः प
रं तत्पूजासारमनुत्तमं। चंद्रोपरागसमये स्नात्वा सामकसत्तमः। विलिख्य धरणीधीमां लिखेद्यंत्रं
महेश्वरि। त्रिकोणं बिंदुसंयुक्तं दशारं पंचकोणकं। वृत्तमष्टदलं देवि भूगृहेण परोजितं॥ सिं
दूरेण महादेवि विलिखित्वाथ हरिद्रया। कुर्यादासनमुख्यादि ततः मुद्रां ततः परं। प्राणान्समर्प्य राम०
देवेशि न्यासं कुर्याद्यथाविधि। चंद्रग्रहणपूजाया ऋषिर्भैरव ईरितः। पंक्तिश्छंदो महादेवि त्रिक १३

टा देवतेरिता। ऐं बीजं सौस्तथा शक्तिः क्लीं कीलकमुदाहृतं। धर्मार्थकाममोक्षार्थे जपे विनियोगः
प्रकीर्तितः। भैरवर्ष्यादिन्यासेन देहं व्याप्य महेश्वरी। मातृकान्यासभेदेन श्रीकंठन्यासके
न च। ध्यात्वा सोमस्थितां देवीं सोमकोटिसमप्रभां। अस्य श्रीचंद्रग्रहणपूजामंत्रस्य भैरव
ऋषिः पंक्तिश्छंदः श्रीत्रिकूटा देवता। ऐं बीजं सौः शक्तिः क्लीं कीलकं। धर्मार्थकाममोक्षार्थे चं
द्रग्रहणपूजाविनियोगः। पात्रस्थापनकर्मादौ कृत्वा बाह्ये महेश्वरी। सन्निवाम नसावध्य
हुं चैव स्वशक्तिकं। आवाह्य सोमं देवेशि स्वागतं चेत्युदीरयेत्। स्थापने संमुखे ध्याने कुर्यान्मु
द्राः षट्पकं षट्पकं। पाद्यार्घ्यादीनि वेद्यादि नम्भात्पूजां समारभेत्। गणेशं नंदिरुद्रं च पुष्प
दंतं किरीटिनं। दक्षावर्त्तेन गंधाद्यैः पूज्यास्ते चतुरस्रके। मंगला पिंगला धन्या भ्रामरी नंदि
का तथा। उल्कासिद्धा संकटा च पूजनीयाष्टपत्रके। वामावर्त्तेन देवेशि पीतपुष्पैर्महेश्वरी
श्रीमहात्रिपुरादीक्षा त्रिपुरमालिनी। पंचारे साधकैः पूज्याः पंचादिक्षा महेश्वरि। वामाव

१४ नैवेद्यगंधार्घ्यधूपदीपप्रसूनकैः॥ इंद्रं विद्याधर्मराजं वरुणं च कुबेरकं। ईशानमग्निपल्लादे
रां वायुं विष्णुं कुमारकं। दशारे षु सितैः पत्रैर्दक्षावर्त्तेन पूजयेत्। कामेश्वरीं स्ववज्रेश्व
रीं पूजयेद्भगमालिनीं। त्रिकोणे पूजयेन्मंत्री पीतपुष्पैर्विशेषतः। सर्वानंदमये चक्रे बे
दवे पूजयेत्ततः। सशिवां च त्रिकूटेशीं महात्रिपुरसुंदरीं। कामेश्वरं महारुद्रं कालाग्निं
भैरवेश्वरं। तत्र पाशांकुशौ चैव चापबाणौ समर्चयेत्। तत्रैव राहुं संपूज्य मूलेनैव सशक्ति
कं। चंद्रं सशक्तिकं चैव कलाः षोडशकास्तथा। नगमाल्या पूजयेत्तत्र रात्रिं चैव समर्चये
त्। देव्यै निवेदितं कृत्वा गंधपुष्पसमन्वितान्। धूपदीपादीन्नैवेद्यं तांबूलानंतु वालुकान्
निवेद्य परमेशानि संध्येसं कल्पपूर्ववत्। न्यासं कृत्वा जपेन्मूलमयुतार्धं सुरेश्वरी। तदर्धं वा
सहस्रैकं जप्त्वा होमं दशांशतः। वर्मनामसहस्रादिस्तवपाठं चरेत्तुनः। दद्यादर्घ्यं त्राय देवे राम
शिरोष्य वर्णतु लोशिवे। गुरवे देवदेवीभ्यां जपं मंत्रि समर्पयेत्। संहारमुद्रया देवीं देवदे १४

व्यै विसर्जयेत्॥ ८॥ अनया पूजया देवी महात्रिपुरसुंदरी। त्रिकूटां पूजयेद्यस्तु ससाक्ष
द्भैरवो भवेत्। नित्यपूजां विधायात्र कोटिसंम हेश्वरि। यत्फलं तत्फलं सद्यः लभते पू
जयानया। पुरश्चर्यासहस्रस्य चाश्वमेधायुतस्य। फलं भवति देवेशि चंद्रग्रहणपू
जयाः॥ चंद्रग्रहणपूजयाः पटलो देवि दुर्लभः। गोपनीयो विशेषेण नान्यथा सिद्धि
हानिदः॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये ष्टमः पटलः॥ श्रीभैरव उवाच॥ कृपया
मितव प्रीत्या हरस्यं देवि दुर्लभं। त्रिकूटायाः परं तत्वं भूकंपार्चनमुत्तमं॥ यक्षणं कंप
ते भूमिर्देवासुर भयंकरी। स एव दुर्लभः कालः पूजया मेपि पार्वति॥ उत्थाय साधकः स्ना
त्वा कृत्वा विष्टर शोधनं। विन्यास्य तत्र श्रीचक्रं यथावद्धर्पितेमया बिंदुत्रिकोणं वसुकोण
वृत्तं तथाष्टपत्रं पुनरेव वृत्तं। भूमंदिरं सुंदरमिंदुवक्त्रे भूकंपचक्रं परदेवतायाः॥ भूकंप
पूजामंत्रस्य ऋषिः प्रोक्तः सदाशिवः। पंक्तिः छंदः समाख्यातं त्रीकूटा देवतेरिताः। ऐं बी

जं सौस्तथा शक्तिः क्लीं कीलकमुदाहृतं। धर्मार्थकाममोक्षार्थे विनियोग इति स्मृतः
सदाशिवर्षिन्यासेन देहं व्याप्य च साधकः॥ भूतशुद्धिं विधायाथ प्राणार्पणविधिं
ततः॥ षोडशान्यासजालेन देहं देवमयं चरेत्॥ ध्यात्वा देवीं भूमिरूपां शेषरूपं म
हेश्वरीं। मनसा बाह्यपूजेन साशिवां परमेश्वरीं॥ भूमिसंशोधमावाह्य तत्र पूजां समा
रभेत्। संकल्प्य साधकः॥ कुर्यात्प्राणायामं त्रयं त्रिवे। पात्राणि स्थापयेत्तत्र देवीं संत
र्प्य नित्यवत्॥ योगपीठार्चनं कृत्वा पूजयेच्चतुरस्रकं। गणेशं धर्मराजं च कुबेरं वरु
णं ततः॥ दक्षावर्त्तेन संपूज्य चतुर्द्वारेषु साधकः॥ कराजाय फडित्येवं तत्राशावंधनं
चरेत्॥ आचम्य कुर्याद्देवेशि षडंगं कूटबीजकैः॥ अणिमाद्यष्टसिद्धीश्च पूजयेदष्ट
पत्रके॥ वामावर्त्तेन गंधार्घ्यसितपुष्पैर्यथाविधि। गंगायै नमः इत्येवं तत्तद्बीजैस्त्रिराव
मेत्॥ सर्वरक्षाकरे चक्रे गुरून् संतर्प्य साधकः॥ त्रिपुरां सशिवां ध्यात्वा भूमिदेवान्

समर्चयेत्॥ शेषकूर्मं मत्स्यराजं समुद्रं च हिमाचलं। दिग्गजानष्टमे शानि पूजयेद्वै ष
डस्रके। गंगां च यमुनां चैव ब्रह्मतीयां च सरस्वतीं॥ त्रिकोणे पूजयेद्देवि क्षौमवस्त्रैस्तथां
बुभिः॥ सर्वानंदमये चक्रे बैंदवे कुलकौलिके॥ श्रीविद्यां कामराजेशीं महात्रिपुरसुंद
रीं। तत्र कामेश्वरं देवि महाप्रेतासनं ततः। पाशांकुशधनुर्बाणान् पूजयेत्साधकोत्तमः
भूमिं संपूजयेत्तत्र पूजयेत्कुलपर्वतान्। गंधाक्षतप्रसूनाद्यैर्धूपदीपादितर्पणैः॥
नैवेद्याचमनीयाद्यैस्तांबूलैश्च सुवासितैः। तद्विंदोः स्वर्णरतिका दशादद्यात्स्वसिद्धये॥
गोदानं साधकः कुर्याद्भूमिदानं तथैव च। यंत्राग्रे च जपेन्मूलमेकसाहस्त्रिकावधि॥ ज
पांते दशांशतो होमः कार्यः सर्पिस्तिलगुडैः। वर्मनामसहस्रादिस्तोत्रपाठं चरेत्ततः॥
देवदेव्यो गुरोर्दद्यात् समर्प्य जपमादरात्। प्रणम्य योनिमुद्रां नत्वा दंडवदीश्वरीं॥ वि
सर्जयेद्देवदेव्यौ मंत्रिसंहारमुद्रया। इत्येषः पटलो देव्या मूकंपार्चाप्रकाशकः गो

पत्नीयो महादेवि कोटी पूजाफलप्रदः। अश्वमेधसहस्रस्य गोमेधायुतकस्य च॥ सुव
र्णं च दानस्य फलं यत्साधकेश्वरी। तत्फलं त्वरितं मंत्रिः चक्रपार्चनतो लभेत्॥
१६ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये नवमः पटलः॥ भैरव उवाच॥ अधुना कथयि
ष्यामि त्रिकूटासारमुत्तमं। नवरात्र्यर्चनं देवि गोपनीयं विशेषतः। चैत्रे मासि सिते पक्षे
दिनानि नव पार्वति। त्रिकूटां पूजयेद्देवीं सिद्धिहानिस्तु नान्यथा। प्रतिपद्दिवसे शौक्ले
ब्राह्मे मौहूर्तिके शुभे। उत्थाय रायनान्मंत्री स्नात्वा गत्वार्चनस्थलीं। समाप्य नित्यक
र्माणि तत्र देवी चरे हिवें। चतुष्कोणमेकहस्तां सर्वतो नीव सुंदरां विलिप्य तत्र देव्या
दौलिखेद्यंत्रं महेश्वरी। त्रिकोणं बिंदुसंयुक्तं षडस्रं वृत्तमंडलं। वसुपत्रं धरागेहं श्री
चक्रं नवरात्रकं। नवरात्रिदिनार्चायाः दक्षिणामुनिरीरीतः। ऋषिः पंक्तिस्तथा छंदः
त्रिकूटा देवते रिता। ऐं बीजं सौः स्तथा शक्तिः क्लीं कीलकमुदाहृतं। धर्मार्थकाममोक्षार्थे। राम० १६

नम मरैः पूज्यमाते प्रसीद॥१॥ इत्येष पटलो गुह्यः सर्वतंत्रेषु गोपितः॥ नवरात्रिदिनार्चायो
१८ लक्षकोटिफलप्रदः। य एवं पूजयेद्देवि समये परमेश्वरी। स एव जगतां लोके विचरेद्भैरवो यथा॥
नित्यपूजा जपो दानं गंगास्नानं महेश्वरि। गजाश्वरथदानं च भूदानं भास्करग्रहे। नवरात्र्यर्च
नस्यापि कालां नार्हंति षोडशीं॥ इदं पूजारहस्यं ते भाषितं भक्तिभावतः। अप्रकाश्यमदातव्यं
गोपनीयं स्वयोनिवत्॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये दशमः पटलः॥ श्रीभैरव उवाच
अथाहं कथयिष्यामि पूजासारं महेश्वरी॥ श्रीविद्या षोडशाक्षर्या न कस्य कथितं मया। अश्वयु
ग्मासि शुक्ले तु प्रतिपद्दिवसे शुभे। उत्थाय साधकः स्नात्वा नित्यकर्म समापयेत्। जपं निर्वृत्य दे
वेशि वेदिमाश्रित्य साधकः। चतुष्कोणां चतुर्मुष्टिप्रमेयां पूर्वदिक्स्थितां। विलिप्य वेदिकां
देवी श्रीचक्रं च विभावयेत्। त्र्यस्रं सबिंदुं शरकोणयुक्तं वृत्ताष्टपत्रांकितषोडशारं॥ भूमंदि राम०
रसुंदरमप्रमेयं श्रीचक्रमेतन्नवरात्रिमुख्यं॥ विनायतत्र श्रीचक्रं साधको मंत्रसाधकः॥ न १८

द्रव्यांशतो होमं कुर्यात्साधकसत्तमः । त्रिकोणं कुंडमापूर्वं हस्तैकेनहिविस्तृतं । त्रिकोणांत
त्रसंधंत्रं चंदनेन विभावयेत् । मध्ये बिंदुं लिखेद्देवि श्रीविद्यां पूजयेच्छिवे । रं रां रूं अग्नये स्वाहा
समवाह्य विभावसुं । ॐ हुं क्षुं हः जटाभार भास्वराग्रेहि प्रज्वलः प्रज्वलेति फट् स्वाहा वह्निंनि
र्मथ्य पार्वती । होमं कुर्यात् घृतक्षीरतिलपुष्पैर्मनोहरैः संतर्प्य देवतां देवि मधुक्षीरसिताम्बु
भिः । ब्राह्मणान् भोजयित्वा च दक्षिणाभिश्च तोषयेत् । घटाग्रे कवचस्तोत्रपाठं कुर्याद्विशे
षतः । जपं गुरुमुखः श्रीदेव्यै सन्निधावायैः समर्पयेत् । एवं पूजयेद्देवीं महात्रिपुरसुंदरीं । नवम्यां
तं महेशानि स तु साक्षान्महेश्वरः । नवम्यां स्वर्णपुष्पाणि नवरौप्यप्रसूनकैः दद्याद्देव्यै घट
स्थां तन्नवमुद्राभिरीश्वरि । प्रणम्य दंडवद्देवि साष्टांगं योनिमुद्रयाः । समर्पये साधकाय घ
टं संहारमुद्रया । यन्मात्राबिंदुबिंदुद्वितयपदपरद्वंद्ववर्णानुरूपं नक्ष्यां नक्ष्यानुपूर्वैर्रहि
तं व्यक्तमेव । ज्ञानाद्ज्ञानतो वा पठितमपठितं सांप्रतं ते पदेस्मिन् सर्वं सांगमस्तु प्रतिदी
॥

विनियोगश्रुतिरीतः । पूर्वं संकल्प्य देवेशि न्यासमृष्यादिकं चरेत् । बृहत्षोढान्निधं मासंभ्वं
खलान्यासमीश्वरी । विधाय भूतशुद्ध्यादि यंत्रपूजां चरेच्छिवे । गणेशानं नंदिनं देवि कुमारं
वीरभद्रकं । चतुरस्रे सितैः पुष्पैर्गंधदीपैः समर्चयेत् । ब्राह्मी वैष्णवी चैव कौमारी चापरा
जिताः । वाराही नारसिंही च तथैन्द्री भैरवि तथा । अष्टपत्रेषु संपूज्यावामावर्त्तेषु पार्व
ति । सर्वैश्वर्यप्रदा देवि तथैव जगमालिनी । वामावर्त्तेन संपूज्याः षट्कोणे साधकोत्तमैः ॥
त्रिपुरां त्रिपुरेशानीं तथा त्रिपुरमालिनीं । त्रिकोणे पूजयेद्देवी ईशानादिक्रमेण तु । सर्वा
नंदमये चक्रे बिंदौ वै षोडशाक्षरीं । श्रीविद्यां च त्रिकूटेशीं महात्रिपुरसुंदरीं । कामेश्वरीं
कामराजं संपूज्य साधकोत्तमः । गंधाक्षतः प्रसूनाद्यैर्धूपदीपादितर्पणैः । तत्रैव घटमा
नीय नूतनं घटमुत्तमं सौवर्णं राजतं ताम्रं मृन्मयं वा महेश्वरि । मूलेन पयसा पूर्यति
र्थान्यावाह्य पार्वति । गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिंधुकावेरि जलेस्मिं

नसंनिधिं कुरु ॥ तीर्थानीति समावाह्य यंत्रे कुंभे महेश्वरि । बैंदवे तत्र संस्थाप्य घटे प्राणा
न्समर्पयेत् ॥ आवाह्य सन्निधिं देवी तत्र प्राणान्समर्पयेत् ॥ इंद्रादिलोकपालांश्च पूर्वप
 श्चिमयोः शिवे ॥ दक्षिणोत्तरयोश्चैव मीशानादिक्रमेण च ॥ ऊर्ध्वमधोर्चयित्वा च मध्ये
दुर्गा नवार्चयेत् । शैलपुत्रि शिवे पूज्ये घंटांत ब्रह्मचारिणी ॥ चंद्रघंटा च कूष्मांडी
स्कंदमाता महेश्वरि । कात्यायनी कालरात्रिर्महागौरिश्च साधकैः ॥ देवदूती च नवमी नव
दुर्गाः समर्चयेत् । कूटत्रयेण संपूज्य मूलविद्यां समुच्चयेत् ॥ त्रिकूटां कामराजं च श्रीविद्यां
षोडशाक्षरीं ॥ घटे संपूज्य गंधार्घ्यदीपधूपप्रसूनकैः ॥ नैवेद्याचमनीयाद्यैस्तांबुलछत्र
चामरैः ॥ मूलविद्यां समुच्चार्य वेदिकायां च वापयेत् ॥ यवान्मूलेन देवेशि मूलमंत्रेण मं
त्रिताः । तदग्रे पंच पात्रिस्थः कुमारीपूजयेत्ततः ॥ पाद्यार्घ्यमधुपर्काद्यैर्गंधाक्षतप्रसूनकैः
माल्यैराभरणैर्दिव्यैः भक्ष्यभोज्यैश्च पायसैः ॥ संतर्प्य विधिवद्देवि घटाग्रे जपमारभेत् ॥ जपा

वराच्चैर्चन स्यास्य दक्षिणामूर्तिरीरितः । ऋषि पंक्तिस्तथा छंदः त्रिकूटा देवतेरिताः ॥ ऐं बीजं सौस्त
था शक्तिः क्लीं कीलकमुदाहृतं । धर्मार्थकाममोक्षार्थे विनियोग इतीरितः ॥ ततो न्यासं शिवे कुर्यात् द
शिर्षोडशापूर्वकं । भूतशुद्धिं प्राणायुक्तिं विधायाचम्य त्रिः शिवे । प्राणायामत्रयं कृत्वा कृत्वादि
गबंधनं ततः । श्रीचक्रे पूजयेद्देवीं त्रिकूटां षोडशाक्षरीं गणेशं वरुणं धर्मं कुबेरं पूजयेत्सदा । गंध
पुष्पार्घ्यधूपैश्च दक्षावर्त्तेन पूजयेत् । देवि कामाकर्षिणी च नित्या कालापदांकिता अं आं बुध्या
कर्षिणी च तथा हंकारकर्षिणी । ईं शब्दापिकर्षिणी नित्यांत पाउस्पर्शाकर्षिणी ॥ उं रूपाकर्षिणी
नित्यां ऋं रसाकर्षिणी तथा । ॠं गंधाकर्षिणीनित्यां लृं चित्ताकर्षिणी ततः ॥ लॄं धैर्याकर्षिणी नित्यां एं
स्मृत्याकर्षिणी ततः । ऐं नामकर्षिणी नित्या ओं बीजाकर्षिणी औं आत्माकर्षिणी नित्या अमृताक
र्षिणी ततः । अं शरीराकर्षिणी च षोडशारेषु पूजयेत् । सर्वसंक्षोभिणी शक्तिः सर्वज्ञा शक्तिरी
श्वरी ॥ नगेश्वरी नगाविंबाचिह्नशक्तिरीदृश्येश्वरी । महालक्ष्मिमहाविद्या पूजनीयाष्टयंत्रके । वा

मावर्त्तैनगंधार्घ्यपुष्पधूपादीतर्पणैः। कालिकानंद्रकालिचज्वालामुखपकुब्जिकं। सुमुखीपंचकोणेषु पू-
१९ ज्यारक्तैःप्रसूनकैः। त्रिपुरांचंडिकांदुर्गांत्रिकोणेपूजयेत्तपकः। सर्वानंदमयेचक्रेबिंदवेषोडशा-
क्षरीं। त्रिकूटांदेविम्यांविद्यांमहात्रिपुरसुंदरीं॥ शिवकामेश्वरंचैवकालाग्निभैरवेश्वरं॥ संपू-
ज्योपरिगंधार्घ्यधूपनैवेद्यतर्पणैः॥ घटनुतनमानियपयसापूरयेत्ततः॥ मुलविद्यांसमु-
च्चार्यबिंदौसंस्थापयेघटं॥ पडिलाशानिबध्वातुपूजयेद्घटमुत्तमं॥ दशादिक्पतयःपू-
ज्यागणेशौनंदिसागराः॥ पर्वतादिगताःपूज्यादेवितस्मिन्घटेपिच। बहिर्घटस्यदेवेशि
गंधाक्षतप्रसूनकैः॥ मध्येघटस्यसंपूज्यानवदुर्गाविशेषतः। घटदेवींचेसन्निधांसमावा-
ह्यातुपार्वति॥ पूजयेन्मूलमंत्रेणनवमुद्राप्रदर्शयेत्॥ कुमारीपूजनंकृत्वापूर्वोक्तवि-
धिनाशिवे। घटाग्रेसाधकःकुर्याज्जपंमंत्रस्यसर्वदा॥ जपाद्दशांशतोहोमः। कार्यसाधकमु- राम. १९
त्तमैः॥ घृतपायसखंडाम्लुशर्करादियवातिलैः॥ ततःसंतर्प्पदिव्यौघसिद्धौघादितगुरून्द्रप

कः॥ ततःस्त्रिकूटांसंतर्प्यत्रिपुरांषोडशाक्षरीं। संमार्ज्यचदशांशेनविप्रान्भोजयेत्ततः दक्षि-
णांत्तिरतुप्यास्यप्रणमेद्योनिमुद्रयाः। यएवंपूजयेन्नित्यंनवाहानिमहेश्वरि॥ त्रिकूटांत्रिपुरां
तारांजपपाडार्चनैःशिवा। यएवंभैरवोज्ञेयःसाधकानयशीश्वरः। नवमेहनिसंपूज्यघ-
टंचैवकुमारिका॥ मूलेनैवबलिंदद्यात्साधकःसर्वसिद्धये संतर्प्यसंधकोविप्रान्भक्ष्यभोज्यै
विशेषतः। दद्याद्दंत्रायस्वर्णस्यरौप्यस्यचमहेश्वरि। माषत्रयंत्रिगुणितंरौप्याताम्रंतथैवच
पुष्पाणिविविनान्येवप्रणमेद्योनिमुद्रयाः। घटंसंपूर्णावदनंदिव्यमालाविभूषितं। मुक्तामा-
णिचीनवस्त्रैरजंकारैरलंकृतं। साधकसाधकार्थेवघटंसंहारमुद्रया। समर्पयेन्महेशानि
प्रणमेद्योनिमुद्रया यएवंपूजयेद्देवींमहात्रिपुरसुंदरीं। नित्यानित्यंपरांक्रींनानित्यानित्यां
सुरेश्वरीं। नवरात्रिदिनेदेवीफलंवक्तुंनशक्यते। जन्मकोटिसहस्रेषुपूजयेद्योमहेश्वरीं स्तो-
त्रैर्नानाविधैस्थैरलंकारणेस्तपा॥ जपेनतपसादानेस्तत्फलंसाधकोलभेत्॥ नवरात्रचं-

२० नवशात्द्दिवरेऽनरवोयपा। इत्येवं पटलो गुह्यः सर्वतंत्रेषु गोपितः गोपनीयो नदृष्टव्यो गुह्यो यं प
रमेश्वरि ॥ इदं रहस्यं परमं सर्वतंत्रेषु गोपितं ॥ अदातव्यमभक्ताय गोपनीयं विशेषतः ॥ इति
रुद्रयामले तंत्रे त्रिकूटारहस्ये एकादशः पटलः ॥ श्रीभैरव उवाच ॥ अधुना श्रृणु देवेशि पू
जां सांक्रमिकीं शिवां । त्रिकूटाया महापूजां पूजाकोटीफलप्रदां ॥ यस्मिन्दिने रविर्देवि सं
क्रमेत्तु एय वर्धिनि । कं न्यां तस्मिंदिने स्नात्वा साधको मंत्रसाधकः ॥ नित्यपूजां समासाद्य चा
रेत्संक्रांतिपूजनं । कं न्यां संक्रांति पूजाया ऋषिः प्रोक्तः सदाशिवः ॥ पंक्तिछंदो महादेवि त्रि
कूटा देवतेरिता । ऐं बीजं सौस्तया शक्तिः ॥ क्लीं किलकमुदाहृतं । धर्मार्थकाममोक्षार्थे विनि
योगप्रकीर्तितः । एवं संकल्प्य देवेशि न्यासन्यासादिकं चरेत् ॥ षोडान्यासं ततः कृत्वा मातृ राम·
काष्टं रत्नांन्यसेत् । भूतशुध्यादिकं कृत्वा प्राणार्पणविधिं ततः ॥ ध्यायेत्रिकूटां सशिवां येन दे २०
वीमयो नवेत् ॥ उन्नप्रहेमरुचिरां रचितं द्रवह्निनेत्रां धनुः ॥ शरयुतां कुशाकाम पाशान् । रमे

नुजैश्च वहतीं शिवशक्तिरूपां कामेश्वरीं हृदि भजामि घृतेंदुलेखां । इतिध्यात्वा महादेवीं श्रीचक्रं
धरणौ लिखेत् ॥ बिंदुत्रिकोणरसकोणयुग्मसुवृत्तरेखाभिमनोहरं च । तपाष्ट पत्रसुधरंग्य हे
शं श्रीचक्रमेतत्परदेवतायाः ॥ १ ॥ सिंदुरेणविनाद्यादौ पात्राणि स्थापयेत्ततः । योगपीठार्च
नं कुर्यार्द्यंत्रे देवीं शिवांकितां । समावाह्य महादेवि नवमुद्राः प्रदर्शयेच्च ॥ पूजयेच्चक्रमालो
स्यं फडिसा शानिबध्य च । गणेशधर्मवरुणः कुबेरसहिताः शिवे ॥ चतुरस्रेत्रसंपूज्यापी
तपुष्पैर्महेश्वरि ब्राह्मी च वैष्णवी चैव कौमारि चापराजिता ॥ वाराहि नारसिंहि च तस्यै द्रीशो
नवीततः । पूजनीया अष्टपत्रे रक्तपुष्पार्घ्यधूपकैः ॥ नंदा मंदाकिनी धात्री अघोरा च महोद
रा । भिक्षुका पूजनीया च बाह्याष्टकोणके शिवे । गंधार्घ्यपुष्पधूपाद्यैर्वामावर्तेन पार्वति । राक्ष
सि डाकिनी चैव शाकिनी गुप्तयोगिनी । हाकिनी लाकिनी पूज्या मध्यषट्कोणके ततः । गंगा च
यमुना चैव वहती यां च सरस्वती । त्रिकोणे पूजयेद्देवि साधको मंत्रसाधकः । सर्वानंदमये चक्रे

वेदवे परमेश्वरि। त्रिकूटां पूजयेद्देवीं महात्रिपुरसुंदरीं देवं कामेश्वरं चैव। कालाग्निभैरवेश्वरं।
गंधाक्षतप्रसूनाद्यैर्नैवेद्यैस्तमनीयकैः। वस्त्रैश्चपरमानर्घैस्तांबुलछत्रचामरैः। संपूज्य यंत्ररा
२१ जस्य बिंदौ दद्यान्महेश्वरि। स्वर्णरौप्यादिपुष्पाणि कांस्यपत्रं तथैव च। नैवेद्यं मूलमंत्रेण रति
कलशं ततः। बिंदौ देवीं स्मरेन्मंत्री सन्निवासहासिननां। पूर्ववद्देवसंकल्प्य जपं कुर्याद्यथाविधि
जयाद्दशांशतो होमकार्यः सर्पिर्यवांकुरैः। कवचस्तोत्रराजं च हुत्वा देव्यै समर्पये। विप्रभोजो
जनं दत्वा साधकेभ्यो विशेषतः। तथैव दक्षिणां दत्वा प्रणमेद्योनिमुद्रया। गुह्यातिगुह्यगोप्त्री त्वं
गृहाणास्मत्कृतं। सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरी॥ इत्येवं पूजयेद्देवीं कन्यासंक्रांतिवा
सरे। गोदानकोटीसहस्रं फलं भवति पार्वति। सप्रजन्मानि यो देवीं कन्यासंक्रांतिवासरे पूज राम.
येन्नित्यकर्मणा॥ यत्फलं तस्य तस्य होमवेद्यै संक्रांतिपूजया। इतिदं परमं गुह्यं रहस्यं सारमुत्तमं २१
गोप्यं गुह्यतमं गोप्यमिताज्ञापारमेश्वरी॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये द्वादशः पटलः

श्रीभैरव उवाच। कथयाम्यद्य देवेशि स्तंभनादिविधिं परं। यं विधाय महेशानि साधको भोग
भाग्भवेत्। स्तंभनं मोहनं चैव मोहनं चैव मारणाकर्षणे ततः। वशीकारोच्चाटने च शांतिकं पौष्टि
कं तथा। सांतानिकं मौक्तिकं वत्वं प्रयोगादश कीर्तिताः। स्तंभनं रविवारे तु स्नात्वा जप्त्वा ब्राह्ममुहूर्ते शिवे
यमुच्चार्य भवेन्नूनं स्तंभनं त्वरितं कलौ। तारं रमां परं तारं कूटत्रयमुदीरयेत्। तारं पसारमां
तारं षट्स्तंभनं करोत्ययं गतेः सूर्यस्य चंद्रस्य जवातादिपापसां। रिपुस्तेन्यादिदस्युनां स्तं
भनं जायते ध्रुवं रवौ स्नात्वा नदीतीरे जपेन्मूलं महेश्वरि॥ यस्योच्चारणमात्रेण मोहमेष्यति
भैरवः। तारं कामः शतातारं कूटत्रयमतः परं। शक्तिकामं पुनस्तारं फट मोहमनुस्मृतः। देवानां
च नरेशानां स्त्रीणामप्सरसां तथा। सद्योदर्शनमात्रेण मोहं तं जायते ध्रुवं। रवौ स्मशाने म
मंत्रस्य जपं कृत्वा महेश्वरि। आनीय नरस्य मुष्टीं च क्षिपेच्छत्रुगृहेऽपि सप्ताहाम्रियते शत्रु त्रि
तुः साधकस्य न संशयः॥ तारं कालीं च कूर्चं च त्रिकूटापदमुच्चरेत्। कूर्चं कालीं तथा तारं।

फट् मारणे मनुस्मृतः । नृपो वा पन्नगेन्द्रो वा विप्रो वा क्षत्रियोपि वा । शत्रुः कालसमानोपि मि
त्रुत्वमेष्यति भैरवि । रवौ मंत्रं जपेत्प्रातः कामी साधकसत्तमः । रंभाद्यप्सरसो देवि नवेदाक
र्षणं ततः ॥ तारं मायां वाग्भवं च कूटत्रयमुदीरयेत् । चंद्रं मारं तथा तारं फडाकृष्टिं मनुस्मृतः
अस्योच्चारणमात्रेण सद्य आकर्षणं भवेत् । रंभा स्वर्गस्थिता वापि प्रातः प्रादुर्भविष्यति ॥ र
वौ मध्याह्नसमये स्नात्वा गंगाजले जपेच्छिवे ॥ जप्त्वा शीघ्रं वशं याति त्रैलोक्यं सचराचरं ॥ तारं
मायां स्मरं स्तारं कूटत्रयं महेश्वरि । तारं स्मरं परं तारं फट् वशीकारको मनुः ॥ अस्योच्चा
रणमात्रेण देवा अपि महेश्वरि । सद्यः किंकरतां यान्ति किं पुनः क्षुद्रभूमिकाः ॥ ५ ॥ रवौ गत्वा श्म
शानं तु जपेन्मूलं महेश्वरि ॥ यज्जपेन भवेच्छत्रोरुच्चाटनमरिंदमं ॥ तारं धूम्रं शरं कामः कू
टत्रितयमुच्चरेत् ॥ कामः शक्तिस्ततस्तारं फट् उच्चाटनको मनुः । दशवारं प्रजप्तेन मंत्रेण प
रमेश्वरि ॥ रिपुमुच्चाटयेद्देवि सर्वं नीममपि प्रिये । रवौ जपन्मनुं देवि दशवारं यथाविधि

त्रिवारं सर्वरोगाणां सद्यः शांतिर्भविष्यति । तारं शारं तारा कामः कूटत्रयं समुच्चरेत् । कामः परां श
स्त्रं तारं फट् शांतिकृद्धरोस्त्ययं । रोगानामतिदुष्टानां ग्रहाणां सुरवंदिते ॥ उपद्रवस्य सर्वस्य सद्य
शांतिर्भविष्यति ॥ रवौ स्नात्वा जपेन्मूलं दशवारं महेश्वरि ॥ पिपासांकितदिग्भागे महापुष्टिः
प्रजायते । तारं मारं स्मरं स्तारं कूटत्रयं महेश्वरि । तारं स्मरं मारं तारं फट् पौष्टिककृद्धरोस्त
यं । दुर्बलानां नराणां च पितॄणां च दिवौकसां । सकृदुच्चारमात्रेण महापुष्टिः प्रजायते ॥ ८ ॥
रवौ जपेन्मनुं देवि साधको देवताग्रहे । येन जप्तेन वंध्या या नवे सुतोन्वयेश्वरः ॥ तारं शारं छ
स्त्रं तारं कूटत्रितयमुच्चरेत् । तारं वारं छत्रं तारं फट् चसांतानिको मनुः । वंध्यायाः काकवंध्यायाः मृतपु
त्रायाः सुरेश्वरि ॥ पुत्रा भवंति नि[illegible]ग्राः स्वकुलैकप्रदीपकाः ॥ ९ ॥ रवौ मंत्री जपेन्मंत्रं तत्स्वरूपं महे
श्वरि । यस्योच्चारणमात्रेण मौक्तिकं जायते ध्रुवं ॥ तारं रमा तारं कूटत्रयमुदीरयेत् । तारं रमा
तारं फट् मौक्तिककृद्धरो[illegible]स्त्ययं । इति दं मम सर्वस्वं रहस्यं त्रिदिवौकसां । गुह्यं गुप्ततमं देवि

२३ न प्रकाश्यं कदाचन॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये त्रयोदशः पटलः॥ भैरव उवाच॥ शृणु
देवि प्रवक्ष्यामि पंचरत्नेश्वरीमनुं। यं जप्त्वा साधकः शीघ्रं विचरेद्भैरवो यथा। त्रिकूटा षोडशी चै
व बाला च सुमुखी तथा॥ तारं स्यात्पंचमी देवि पंचरत्नेश्वरी स्मृता। एतासां मंत्रजाप्येन कालौ
षोडशी सिध्यति। नान्यथा सिद्धिहानिः स्यादित्याज्ञा परमेश्वरी। एतासां मूलमंत्रांस्ते सर्वतंत्रे
षु गोपितान्। प्रवक्ष्यामि तव प्रीत्या कदाचिन्न प्रकाशयेत्। वेधो वह्नी जिह्मो मोहार्णो मायाशो
णा शक्ति वह्न्यर्णो कांति मोहाः। मायां शक्तिं वारुणां मोहमाया विद्धेयं स्याद्देवि पंचत्रयार्णा॥ श
कएईलह्रीं हसकहलह्रीं सकलह्रीं। लक्ष्मीः परा मदनजाप्तं वशक्तियुक्ता तारं च नूतिकम
ला कथिता च विद्या। शक्त्यादिकं तु विपरीततया च प्रोक्ता श्रीषोडशाक्षरविधिः मुनदोसं
पूर्णः। स्पष्टं वाग्भवं शक्तिबीजकामराजस्तृतीयकः। बालायै नमः इत्येवं त्र्यक्षरीति समीरि राम॰
ताः। ऐं सौः क्लीं बालायै नमः। वाग्भवे कामराजश्च उच्छिष्टपदमीरितं। चांडालिनिति सुमुखी देवि। २३

महापिशाचिनी। मः पार्श्वोपसंत्रितयं उद्धयं च प्रकाशयेत्। ऐं क्लीं उच्छिष्टचांडालिनी सुमुखी
देवि महापिशाचिनी क्लीं ठः ठः ठः स्वाहा। तारं मायां वधूं कूर्चं कालीं लक्ष्मीस्ततो भिदं। शा
क्तिः कामः परा लक्ष्मीः उद्धृयं षोडशाक्षरी। प्रोक्तो महामनुर्देवि गोपनीयो विशेषतः। सिद्धिदो
मोहनो नामः देवानामपि दुर्लभः। क्लीं स्त्रीं हूं क्रीं उम तारे सौः क्लीं ह्रीं श्रीं स्वाहा। इत्येवं गुप्तविद्ये
यं जप्त्वा साधकसत्तमैः। प्रत्यहं षोडशीविद्यासिद्धिमेति महेश्वरि। पंचरत्नेश्वरीविद्याजपा
त्सैः साधकोत्तमः। ततो यथोक्तविधिना जयेच्छि षोडशाक्षरी। इति श्रीपटलो गुह्यः पंचर
त्नेश्वरीविधिः गुह्याद्गोप्यतमो गुप्योन प्रकाश्यः कदाचन॥ इति श्रीरुद्रयामले तंत्रे त्रिकूटारह
स्ये चतुर्दशः पटलः॥ भैरव उवाच॥ अथाहं कथयाम्यद्य दीपदानविधिं परं॥ श्रीदेव्याः षोडशाक्ष
र्यास सर्वाभिलषितसिद्धिदं सुदीने कार्त्तिकस्यादिवासरे षोडशाक्षरी॥ त्रिकूटां दीपरूपां च पूजये
त्परमेश्वरि। मुहूर्ते शुभदे ब्राह्मे उत्थाय शयनाच्छिवे। स्नात्वा कृत्वा नित्यकर्म दीपदानार्चनं

२७ चरेत् विधिवद्दद्गणौयंत्रं। त्रिकोणं बिंदुभूषितं। विलिख्य देवतां ध्यात्वा पात्रमानीय साधकः। सौव
र्णं राजतं ताम्रं यथाशक्त्या महेश्वरि। वर्तिं स्वर्णमयीं कृत्वा गोघृतेन च पूरयेत्॥ त्रिकूटादीप-
दानस्य पूजया ऋषिरीश्वरः। पंक्तिः छंदो महादेवि त्रिकूटा देवतेरिता। ऐं बीजं सौः स्तथा श-
क्तिः कामराजश्च कीलकं। धर्मार्थकाममोक्षार्थे विनियोग इतीरितः। ईश्वरर्ष्यादिन्यासेन मातृ
कान्यासकेन च। देहं व्याप्य महेशानि कुर्यादासनशोधनं॥ भूतशुद्धिक्रमं कृत्वा प्राणार्पण
विधिं ततः॥ त्रिकोणे पूजयेद्गंगायमुनां च सरस्वतीं॥ कूटत्रयेण श्रीबिंदौ श्रीविद्याम्मूल
विद्यया। लक्ष्मीर्माया परालक्ष्मीः कामः चंद्रस्वरत्रपाः। दीपवर्यं गृहाणेति कूटत्रया-
मुदीरयेत्। स्वरादादिरमार्णांतं कुर्याद्विजविपर्ययं। अनेन मंत्रराजेन दीपपात्रं च पार्व
ति त्रिकोणे स्थापयेद्देवि पश्चिमाभिमुखं ततः। मूलमंत्रेण प्रज्वाल्य प्रदीपस्य सुरेश्वरि त राम. २७
त्पूर्वोक्तमंत्रेण लयांगं पूजयेच्छिवे गणेशावरुणौ धर्मं कुबेरौ पूजयेत्ततः। कराल विकरा

लौ च संहाररुद्रभैरवौ। महाकालं च कालाग्निं सुपन्नमत्तौ महेश्वरि। संपूज्य त्रिपुरां तारा
कालिं त्रिपुरभैरवीं॥ बालां च त्रिपुरेशानीं कूटत्रयेण पूजयेत्॥ कामेश्वरीं च सन्निवां-
दीपे कामेश्वरीं च संनिवां॥ कालाग्निं कामराजं च पूजयेन्मूलविद्यया। गंधार्घ्यपुष्पधू-
पादि दीपनैवेद्यचामरैः। संपूज्य दीपवर्याय दद्यात्स्वर्णतुलाधिकं। साधकस्य पुनर्देवि विन
वेसिद्धिर्यपेक्षिता। दीपाग्रे च जपेन्मूलं ततः पाठं चरेत्ततः। होमो दशांशतः कार्यः सर्पि
पायसशर्करैः। संपूज्य विधिवद्दीपं प्रणमेद्योनिमुद्रया। देवीमयं विसृज्याथ दीपसंहा
रमुद्रया। साधकाय ततो दीपं साधको मंत्रसाधकः। यः कुर्याद्दीपदानं हि त्रिकूटायाः
सुरेश्वरि। दत्तं तेनैव त्रैलोक्यं सुमेरुसहितं शिवे। इत्येष पटलो गुह्यो रहस्यातिरहस्यकः
अप्रकाश्य परो गुह्यो गोपनीयो विशेषतः॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये पंचद
शः पटलः॥ श्रीभैरव उवाच॥ अथ वक्ष्यामि देवेशि शक्तिःपूजायथाविधि। त्रिकूटा

यापरं गुह्यमकार्त्स्न्यं सुदुर्लभं । दिने भुजे महादेवि स्नात्वा गत्वार्चनस्थली । समाप्य नित्यक
२५ र्मादीनि न्यासादौ शक्तिमर्चयेत् ॥ श्रीशक्तिपूजासारस्य ऋषिः प्रोक्तः सदाशिवः । पंक्तिश्छंदः स
मास्व्यातं त्रिकूटा देवतेरिता । ऐं बीजं सौः स्वयं शक्तिः । क्लीं कीलकमुदाहृतं । धर्मार्थकाम
मोक्षार्थे विनियोग इति स्मृतः । सदाशिवर्षिन्यासेन षडंगन्यासकेन च । षोडान्यास
क्रमेणैवं देहं व्याप्य महेश्वरि ॥ आसनं नैव संशोध्य भूमिं संशोध्य साधकः । भूतशुद्धिं
विधायाथ प्राणपर्णविधिं ततः । भूमियंत्रं लिखित्वा तु सिंदूरेणात्र वर्णते । बिंदुं त्रिको
णं षट्कोणं वृत्तं नागदलांकितं । भूगृहं षोडशी शक्तिपूजायंत्रमुदाहृतं । यंत्रं विलिख्या
ति दीर्घविस्तृतं परमेश्वरि । स्वशक्तिं परशक्तिं वा नग्नां मुक्तकचां शिवे । भाजानुरुणशोभा राम
यां स्वर्णकंकणराजितां । स्नात्वा तामादाय देवेशि स्वयं नग्नोत्र साधकः । गणेशं धर्मराजं च व २५
रुणं च कुबेरकं । संपूज्य साधको गंधाक्षतपुष्पैः सशक्तिकः ॥ करालं विकरालं च संहारं रुरुम्

भैरवं । कालाग्निं च महाकालं सुप्रमुन्मत्तभैरवं । अष्टपत्रे सुसंपूज्य गंधाक्षतप्रसूनकैः । त्रि
पुरां भैरवीं तारां बालां च सुमुखीं प्रिये । भगमालां चेषट्कोणे पूजयेद्धूपपुष्पकैः । षट्कोणं
चैव संपूज्य त्रिकोणं पूजयेत्ततः । गंगां च यमुनां देवि द्वितीयां च सरस्वतीं । गंधाक्षतप्रसू
नाद्यैर्धूपदीपादितर्पणैः । बिंदौ कामेश्वरीं देवीं त्रिकूटां षोडशाक्षरीं ॥ कामेश्वरीं च कालाग्नी
कामराजं महेश्वरि । गंधाक्षतैश्च संपूज्य तत्र घंटारवं चरेत् । भूतानुस्वार्थमंत्रेण निबध्वा
शास्वमूलतः । शक्तिं देवीमयीं ध्यात्वा स्वं वै शिवमयं स्मरेत् ॥ यंत्रे शक्तिं निवेश्यादौ दक्षि
णकरांतरे । उपविश्य स्वयं चैव पूजां कुर्याद्यथाविधि । कूटत्रयेण देवेशि गंधाक्षतप्रसू
नकैः । त्रिपुरा मस्तके पूज्या कुतले त्रिपुरेश्वरी । ललाटे त्रिपुराध्यक्षा भ्रुवोस्त्रिपुरवासि
नी । नेत्रयोस्त्रिपुरेशानि कर्णयोस्त्रिपुरार्चिताः । नासिकायां त्र्यक्षरीति गंडयोस्त्रिपु
रांबिका । मुखे त्रिपुरविद्या च कंठे त्रिपुरमालिनी । स्कंधयोस्त्रिपुराध्ये पाहस्तयोस्त्रिपु

रोत्नमा वक्षसित्रिपुरश्रीका कुचयोस्त्रिपुरोष्टिदा । कुक्षौत्रिपुरमूर्त्तिश्च पार्श्वयोस्त्रिपुराकुला ॥
दृष्टेत्रिपुरचक्रेशी नाभौत्रिपुरसूदिनी । योनौत्रिपुरयोतिश्च गुह्येत्रिपुरगोपिता । उर्वोस्त्रि
पुरमन्त्रेशिजान्वोस्त्रिपुरजंगमा । जंघयोस्त्रिपुराजेष्टापादयोस्त्रिपुरान्विताः । पादादिमू
र्धपर्यंतेगात्रेत्रिपुरासुंदरी । पुजनीयामहादेविगंधाक्षतःप्रसूनकैः । विविधैःकुसु
मैर्देविनक्ष्येर्नोजेविशेषतः । द्रव्येणविविधाहारैः । शक्तिसंतर्प्यपार्वतिः । रेतःस्त्रावे
जपेन्मूलंयपाशक्त्यामहेश्वरि । महात्रिपुरविद्यांतुरतसातर्पयेच्छिवे । संपूज्यविवि
धैःपुष्पैःप्रणमेद्योनिमुद्रया । आत्मानंशिवरूपंतांशक्तिंदेविंस्वरूपिणीं । विसर्जयेत्तुवि
द्यायान्तुवासंहारमुद्रयाः । इतिश्रीशक्तिःपूजायाःशिवेगुह्यंरहस्यकं । अदातव्यमभ
क्तायगोपनीयंस्वपिनिवत् । इतिरुद्रयामलेतंत्रेत्रिकूटारहस्येषोडशाःपटलः । श्री
भैरवउवाच । शृणुदेविप्रवक्ष्यामिकवचानिचषोडशाः । येषांपाठैकमात्रेणदेवीदर्श

नमाप्नुयात् । तत्रादौकवचंदिव्यंवज्रपंरकाभिधं । गुह्यंवक्ष्यामितेदेविनप्रकाश्यकदा
चन । वज्रपंजरकस्यास्यकवचस्यऋषिशिवः । पंक्तिःछंदोमहादेवित्रिकूटादेवतेरि
ता । ऐंबीजंसौःस्तथाशक्तिः । क्लींरांकिलकमुदाहृतं । धर्मार्थकामामोक्षार्थेविनियोग
प्रकीर्त्तितः । ॐह्रीं श्रींत्रिपुरापातुशिरोनेत्रांतमीश्वरी । ॐह्रींश्रींबलदापातुमुखंकंठांत
मीश्वरी । ॐश्रींबालासदापातुहस्तौमेनखरांतकौ । ॐक्लींश्रींत्र्यक्षरीपातुवक्षोनाभ्यंत
मीश्वरी । ॐक्लींश्रींत्र्यक्षरीपातुवक्षोनाभ्यंतमीश्वरी । ॐश्रींषोडशीपातुपृष्ठंपार्श्वांतकंशि
वे ऐंसौःक्लींत्वरितापातुकटिमेद्यांतकंतथा । ॐक्लींश्रींजघिजापायादूरूजंघांतकौशिवे
ॐऐंक्लींश्रींमहिमायातुपादौनखयुतौशिवे । शिरसःपादपर्यंतंपादादिमस्तकांतकं
त्रिकूटाषोडशीविद्यापायान्मेसकलंवपुः । श्रींश्रींश्रींहहहाहहाहिशाशाशा । श्रींषोडशी
ह्रींस्लौंक्लींपायात्सकलासुदिक्षुसततंक्लींह्रीं । महाषोडशीसौःसौःसौःससस । क्लींनग

वतीदेवीत्रिकूटावतादघोरंबुनिधेःअवाप्य। सशिराश्चौराश्वमृत्युर्नसोपात॥१॥ इतीदंकव
२१ चंदिव्यंत्रिकूटायारहस्यकं। गोप्यंगुह्यतमंदेविकदाचिन्नप्रकाशयेत्॥ इतिश्रीरुद्रयाम
लेतंत्रेत्रिकूटारहस्येसप्तदशः पटलः॥ श्रीभैरवउवाच॥ अथचिंतामणिनामप्रवक्ष्येक
वचंमुत्तमं। सर्वसिद्धिमयंदेविसर्वाशापरिपूर्वकं। कवचस्यास्यदिवेशौब्रह्मर्षिर्भैरवउच्यते
पंक्तिःछंदोमयाख्यातस्त्रिकूटादेवतेरिता। ऐंबीजंसौस्तथाशक्तिः क्लींकीलकमुदाहृ
तं। सर्वार्थसिद्धयेदेविविनियोगःप्रकीर्तितः। ऐंमेपातुशिरोनित्यंसौमेनेत्रेसदावतु॥
क्लींमेकर्णौसदापातु ऊंमेपातुसनासिकां। क्लींमेमुखंसदापातुश्रीमेश्रोष्ठौसदावतु॥सौ
मेजिह्वांसदापातुक्लींमेकंठंसदावतु। श्रींमेस्कंधौसदापातुऐंमेहस्तौसदावतु। सौःमे राम.
वक्षःसदापातुक्लींमेकुक्षिंसदावतु॥ श्रींमेपृष्ठंसदापातुक्लींमेपार्श्वौसदावतु॥ कंमेना २१
भिंसदापातुऐंमेकटिंसदावतु॥ ईंमेलिंगंसदापातुलंमेमेढ्रंसदावतु। क्लींदुरूसदापा

तुऐंमेजानुसदावतु। हंमेजंघेसदापातुसंमेगुल्फौसदावतु। कंमेपादौसदापातुहंमेधातुन्स
दावतु। लंमेहृदंत्राणिपातुक्लींमेव्यापकलंवपुः। संमेदिक्षुसदापातुकंमेसकलनीति
षु। लंमेपायाद्रणेनित्यंक्लींमांमृतुःसदावतु। इदंकवचराजेशंश्रीचिंतामणिनामकं। गु
ह्यंमंत्रमयंदिव्यंसर्वसिद्धिप्रदायिने। पठेद्राजौमहादेवीमुक्तःस्यावेमहेश्वरि। सर्वानंद
मंत्रमयंदेविपुत्रोभविष्यति॥ इदंरहस्यंपरमंत्नक्षातवमयोदितं सर्वमंत्रमयंगुह्यंसा
धकानप्रकाशयेत्॥ इतिश्रीरुद्रयामलेतंत्रेत्रिकूटारहस्येअष्टादशः पटलः॥ श्रीभैर
वउवाच॥ अधुनाकथयिष्यामिजगन्मंगलकारिणं॥ कवचंपरमंपुण्यंनिश्चितंपरमाद्भु
तं। जगन्मंगलकारस्यकवचस्यऋषिशिवः। छंदोमयेरितापंक्तिस्त्रिकूटादेवतेरिताः॥
ऐंबीजंसौस्तथाशक्तिःकामराजश्चकीलकं। सर्वमंगलसिध्यर्थेविनियोगःप्रकीर्तितः। ॐक्लीं
मेमस्तकंपातुजगन्मंगलकारिणी। ललाटंपातुमेॐश्रींजगन्मोहनकारिणी॥ ॐक्लींमेपातु

नेत्रे द्वे जगत्ससंतोषकारिणी। ॐ सौः मे पातु कर्णौ च जगत्कल्याणकारिणी। ॐ श्रीं नासां सदा पा-
२८ तु जगदैश्वर्यदायिनी। ॐ ह्रीं ओष्ठौ सदा पातु जगद्वल्लेश्वरी सदा। ॐ क्लीं मुखं सदा पातु जग-
द्दिग्विजयकारिणी। ॐ श्रीं कंठं सदा पातु जगद्रक्षाकरी शिवा। ॐ श्रीं स्कंधौ दोः सदा पातु जग-
ज्जयप्रदा शिवा। ॐ क्लीं हस्तौ सदा पातु जगद्विजयकारिणी। ॐ श्रीं वृक्षः सदा पातु जगद्वश-
करि तथा। ॐ श्रीं कुक्षीं सदा पातु जगन्महत्वदायिनी। ॐ श्रीं पार्श्वौ सदा पातु जगदिशि-
त्वदायिनी। ॐ क्लीं पृष्ठं सदा पातु जगत्स्थिताहरेश्वरी। ॐ क्लीं नाभिलिंगं सदा पापु जगज्जैत्रप्रदा
शिवा॥ ॐ क्लीं त्रिशिरं सदा पातु जगत्त्रयप्रदा ततः। ॐ [illegible] ऊरू सदा पातु जगद्रोगगहरं शि-
वा। ॐ ह्रीं श्रीं जानू सदा पातु जगज्जटिलमस्तका॥ ॐ सौः जंघे सदा पातु जगज्जांबुनदप्र-
भां। ॐ सौः पादौ सदा पातु जगच्छत्रेश्वरी शिवा। ॐ क्लीं मे व्याद्यः सर्वजगत्त्रिपुरसुंदरी ॐ क्लीं राम
पूर्वे वतां ब्राह्मी दाक्षिणे चापराजिता। पश्चिमे पातु कौमारी वाराही चोत्तरे नतु। आग्नेयां २८

वैष्णवी पातु नैरृत्यां नारसिंहिका। वायव्यां शांभवी पायादैशान्यां पातु वैष्णवी। ऊर्ध्वं मे पातु
चामुंडा पातु अधो भुवनेश्वरी। अग्नौ वा बुचारे भोगह नष्टवसंयुगे। ॐ श्रीं क्लीं पातु मां नि-
त्यं त्रिकूटा षोडशाक्षरी। इतीदं कवचं गुह्यं जगन्मोहनकाभिधं। रहस्यं परमं दिव्यं स-
र्वमंत्रमयं शिवे। यः पठेदर्धरात्रे तु नग्नो वा मुक्तकुंतलः॥ तस्य श्रीषोडशीविद्यासि-
द्धा स्यान्न संशयः। रणे राजकुलेद्युते पाठा सिद्धिर्न विष्यति। किं किं न साधयेद्देवि क-
वचस्य प्रसादतः। इदं ते कवचं देवि रहस्यं सर्वकामदं। अप्रकाश्यमदातव्यं गोपनी-
यं प्रयत्नतः॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये एकोनविंशपटलः। श्रीभैरव उवा-
च॥ अधुना कथयिष्यामि जगन्मोहनकाभिधं। कवचस्यास्य देवेशि ऋषिर्भैरव उच्य-
ते। पंक्तिछंदो महादेवि त्रिकूटा देवता रिता। ऐं बीजं सौः तथा शक्तिः क्लीं कीलकमुदा-
हृतं॥ धर्मार्थकाममोक्षार्थे मोहने विनियोगः॥ ऐं क्लीं बाल शिरः पातु। क्लीं सर्वं क्लीं शि

२९

रोवतु। ॐ श्रीं कंठं चरु द्वाणि। ॐ श्रीं स्कंदोदरी। ॐ क्लीं सं पातु मे हस्तौ महात्रिपुरभैरवी। श्रीं क्लीं
मे पातु चामुंडा कुक्षिन्याम्यंतकं तथा। ऐं सौः ऐं सौः क्लीं पातु मे दुर्गा जानू गुल्फांतकौ तथा
ॐ श्रीं क्लीं पातु मे ब्राह्मी पादौ नखरसंयुतौ। श्रीं क्लीं क्लीं ऐं सौः। ॐ श्रीं त्रिकूटावतु मे वपुः
पूर्वादिदिक्षु सततं क ए ई ल ह्रीं प्रातर्निशांतमवताद्ध स क ह ल ह्रीं॥ घृताजिराजकु
लजीतिषु स क ल ह्रीं पायान्महात्रिपुरसुंदरि मंत्रराजः॥१॥ इत्येतत्कवचं दिव्यं जग
न्मोहनकारिधं॥ पठेद्धारये देवि श्रीविधाने न सिध्यति॥ इदं ते कवचं दिव्यं
त्रिषु लोकेषु दुर्लभं॥ गुह्यं सर्वस्वमीशानि प्रकाश्यं न प्रकाशयेत्॥ इति श्रीरुद्र
यामले तंत्रे त्रिकूटारहस्ये विंशतमः पटलः॥ श्रीभैरव उवाच॥ अधुना देवि वक्ष्या राम
मि जगदीशानिधं परं॥ कवचस्यास्य देवेशि ऋषिः कालाग्निरीरितः। पंक्तिश्छंदो म २९
हादेवि त्रिकूटा देवतेरिता॥२॥ कवचं मंत्रगर्भं तत्सर्वसिद्धिप्रदायकं॥१॥ ऐं बीजं सौःश

क्तिः क्लीं कीलकमुदाहृतं। धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः। ऐं सौः गौरी शिर
पातु नेत्रे श्रीजगदंबिका। नासां श्रीनारसिंही च ॐ श्रीं तारावतान्मुखं। हृदयं क्लीं चंडिका
व्यानानि नारायणी ह्सौः। ॐ श्रीं ह्रिंमंजवानी च गुह्यं गुह्यकेश्वरी। ॐ श्रीं जानुद्वयं
ज्योति। ॐ जुं जंघे जगल्लिया। पादौ श्रीं क्लीं परादेवी वपुः क्लीं जगदीश्वरी। दिक्षु प्रातर्निशा
यां च घृतजीन्द्र पृत्नीतिषु॥ चौरासिंहादिपोतेषु पायाद्धी षोडशाक्षरी। इति दं कव
चं देवि मंत्रः गर्भं महेश्वरी॥ पठनाद्धारणान्मंत्री जगदीशत्वमाप्नुयात्। इदं कव
चमीशानि गुह्यं सर्वस्वमुत्तमं॥ अदातव्यमभक्तव्यगोपनीयं स्वयोनिषत्। इति श्री
रुद्रयामले तंत्रे त्रिकूटारहस्ये एकविंशपटलः। श्रीभैरव उवाच। अधुनाष्ट शु
देवेशि कवचं कामिकाभिधं। यः पठित्वा जवेत्सद्यो विद्याधनु जनेश्वरः। कवचस्या
स्य देवेशि ऋषिः प्रोक्तः सदाशिवः। पंक्तिः छंदः समाख्यातं त्रिकूटा देवतेरिता। ऐं बीजं

सौस्तपा शक्ति कामराजस्तु कीलकं। धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्त्तितः। ॐ श्रीं
३० ह्रीं कालिका पातु त्रिनेत्रा त्रिपुरेश्वरी। ॐ ऐं सौः मे श्रुती पातु त्र्यक्षरी त्रिपुराम्बिकाः। ॐ क्लीं
मे वदनं पातु महात्रिपुरभैरवी। ॐ सौः क्लीं मे गलं पातु महापंचदशाक्षरी। ॐ श्रीं ह्रीं
मे तु जौ पातु क्लींकारत्रयरूपिणी। ॐ सौं मे हृदयं पातु हुंकारद्वयरूपिणी। ॐ श्रीं ना
भिं सदा पातु देवेशी दिव्यकुंडला। ऐं सौः क्लीं पातु मे शिश्नं महात्रैलोक्यभूषणा॥
ॐ श्रीं ह्रीं पातु मे जानू महाविजयदायिनी। ॐ ॐ श्रीं पातु मे जंघे जगदानंददायिनी
ॐ श्रीं ह्रीं पातु मे पादौ महाकामेश्वरी सदा। ऐं सौः क्लीं मे वपुः पातु महात्रिपुरसुंद
री। प्रातः प्रभृति सायांतं सायादिप्रातरंततः। दशादिक्षु सदा पातु ॐ श्रीं ह्रीं बागला
मुखी। रणे राजकुले द्यूते विषमे चौरयोनावतके श्रीं ह्रीं ऐं सौः पातु महाकूटेश्वरी स राम
दा। इदं कवचराजाख्यं काम्यकं कवचं परं। पठेद्यो मे पुनेरात्रौ स याति परमं पदं॥ ३०

कवचस्यास्य पठनाद्धारणाद्वा महेश्वरी। विद्याधरेश्वरपदं याति साधकसत्तमः। ब्राह्मं
वैष्णवं शैवं दैविकं धाम याति सः। किं पुनर्गणगंधर्वसिद्धानां मन्त्रकाकथा। इदं गुप्त
त्र३ मेव मे मंत्रगर्ज्ञे सुदुर्लभं। अकृत्वा यं महादेवि गोपनीयं प्रयत्नतः॥ इति श्रीरुद्रयामले
तंत्रे त्रिकूटारहस्ये द्वाविंशपटलः। श्री भैरव उवाच। अधुना देवि वक्ष्यामि कवचं अक्षरा
निधं। यं धत्वा साधको नूनं विचरेद् भैरवो यथा। कवचस्यास्य देवेशि ऋषिर्बटुकभैरवः।
पंक्तिछंदः समाख्यातं त्रिकूटा देवता रिताः। ऐं बीजं सौः स्तपा शक्तिः। क्लीं कीलकमुदाहृ
तं। धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्त्तितः। श्रीं श्रीं श्रीं मे शीरः पातु षोडशी देववंदि
ता। ह्रीं ह्रीं ह्रीं मे वतान्नेत्रे देवी ज्वालामुखी सदा। क्लीं क्लीं क्लीं मे वता द्वक्रं देवी मातंगिनि प
रा। सौः सौः सौः मे तु जौ पातु देवी महापिशाचिनी। ॐ ॐ ॐ मे वता द्वक्षो देवी चंडालिनी सदा।
क्रीं क्रीं क्रीं मे पातु नाभिं देवी द्वाविंशदक्षदी। हूं हूं हूं मे वता जानू देवी श्री उग्रतारिणी। स्त्रीं

३१ स्त्रीं स्त्रीं पातु मे जंघे देवी नलयताकिनी। श्रीं क्रीं क्लीं पातु मे पादौ महात्रिपुरसुंदरी। ऐं सौः क्लीं
पातु मे शेषं वपुः श्रीं क्रीं डाक्षरी। इतिदं कवचं गुह्यं धारणात्कामनावहं। सिद्धसाध्यं सिद्धिद
च गोपनीयं महेश्वरी। इति रुद्रयामले तंत्रे त्रिकूटारहस्ये त्रयोविंशः पटलः। श्रीभैरव उवा
च। अधुना कथयिष्यामि रहस्यं मम पार्वति। त्रिविक्रमाख्यं कवचं मंत्रगर्भं महेश्वरि। कवच
स्यास्य देवेशि ऋषि प्रोक्तो महेश्वरः। पंक्तिछंदः समाख्यातं त्रिकूटा देवतेरिता। ऐं बीजं सौ
स्तथा शक्तिः क्लीं कीलकमुदाहृतं। धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्त्तितः। श्रीं क्रीं क्लीं ऐं
सौः ॐ क्रीं श्रीं शिरो मे व्याघ्रदंतकं। परिवारयुता मे स्याद्दंतको नाम महात्रिपुरभैरवी। क ए ई
ल ह्रीं हसकहल ह्रीं सकल ह्रीं हृदादि पातु मे सदा। जान्वंत त्रिपुरे शान्ति स शिवा शिवावि
ष्टरा सौः ऐं क्लीं क्रीं श्रीं मे पादपर्यंतमीश्वरी। जानुन्यासततं देवी महात्रिपुरसुंदरी। रा राम. ३१
ऐ राजकुले द्यूते वने प्राणिमहाभये। क्रीं हूं क्रीं मे वतात्सर्वं वपुः श्रीं षोडशाक्षरी इदं क

वचराजेशं पठेद्यः धारयेद्भुजे त्रिविक्रमाख्यो मंत्रोयं किं किं तस्य न ते फलं। साधको विचारे भूमौ
सर्वैश्वर्यसमन्वितः। सर्ववदग्नि जल उदस्नि विक्रम स्वापरः। इदं रहस्यं परमं गुह्यं कवचमुत्तमा
मं। अनक्रेभ्योपि पुत्रेभ्यो गोपयेल्लगनंदिनि॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये चतुर्विंशः
पटलः। श्रीभैरव उवाच। अधुना देवि वक्ष्यामि कवचं परमाद्भुतं। त्रैलोक्यभूषणं नाम
गोपनीयं परात्परं। कवचं स्यास्य विख्यात ऋषिः कालाग्निरीरितः। पंक्तिछंदः समाख्यातं
त्रिकूटा देवतेरिता। ऐं बीजं सौ स्तथा शक्तिः कामराजस्तु कीलकं। धर्मार्थकाममोक्षार्थे
विनियोगः प्रकीर्त्तितः। ॐ शिरः पातु मे नित्यं क्लीं ललाटं सदावतु। श्रीं नेत्रे पातु हूं कर्णौ ऐं मु
खं सौः भुजौ तथा। ॐ श्रीं सौः पातु हृदयं कुक्षिं क्रीं क्रीं सदावतु। नाभिं श्रीं क्रीं गुदं स्त्रीं हि
स्त्रं श्रीं क्रीं कटीं तथा। ॐ श्रीं जानौ सौः जंघे क्रीं गुल्फौ मे सदावतु। श्रीं पादौ सकलं गात्रं पातु
क्रीं षोडशाक्षरी। प्रातः प्रभृति सायांतं सायादि प्रातरं ततः। दिग्विदिक्षु मां पातु ऐं सौः क्लीं

पुरसुंदरी। इतिश्रीकवचदिव्यंत्रिकूटायारहस्यकं। पवित्ताधारयेन्मंत्री पूजाफलमवाप्नुयात्।
३२ रणे द्यूते राजनये सत्वनीतौ सुदुर्गतौ। संकटे कवचस्मृत्वा सर्वत्र विजयं लभेत्। इतीदं
कवचं देवि महामंत्रमयं परं। त्रैलोक्यदूषणं नाम गोपनीयं स्वयोनिवत्। इति रुद्रयाम
लेतंत्रे त्रिकूटारहस्ये पंचविंशपटलः। श्रीभैरव उवाच। शृणु देवि प्रवक्ष्यामि कवचं
मंत्रविग्रहं। विरूपाक्षाभिधं दिव्यं गोपनीयं प्रयत्नतः। ऋषिः स्यात्कवचं स्यास्य बटुकोभै
रवेश्वरि। पंक्तिः छंद इतिख्याता त्रिकूटा देवतेरिता। ऐं बीजं सौः स्तपाशक्तिः क्लीं कीलकमु
दाहृतं। धर्मार्थकाममोक्षार्थे विनियोग इतिस्मृतः। ॐ श्रीं शिरोज्याद्भटुको। ॐ क्रीं पंक्ति
स्तपामुखं। ॐ श्रीं वक्षस्थिति त्रिकूटा दें क्लीं हृत्सौ ऐं तथा। ॐ सौः नाभिं पातु मे सौः शिश्नं क्रीं रम-
कीलकं। ॐ क्रीं धर्मः कटिं पातु ॐ ऐं अर्थ ह्रह्रं ह्रं कं। ॐ सौः जानू पातु कामे श्रं क्लीं मोक्षो ३२
पि गुह्यकौ। ॐ क्रीं में घ्रिं युगं पातु ऐं सौः क्लीं विनियोगकः। पूर्वादिदिक्षु प्रातस्थसायं चैवा

धरात्रके। ॐ श्रीं क्रीं पातु मां नित्यं त्रिकूटा षोडशाक्षरी। इतीदं कवचं दिव्यं परात्परहस्यकं
त्रिकूटायाः परं तत्वं पठनीयं च साधकैः। धृत्वा कवचमीशानि दिव्यं मंत्रैकसाधकं स
र्वसिद्धियुतो भूत्वा विचरेद्भैरवो यथा। इति श्रीकवचं गुह्यं सर्वतंत्रेषु गोपितं। सर्वस्वंच
रहस्यं मे न देयं परमेश्वरि। इति श्रीरुद्रयामले तंत्रे त्रिकूटारहस्ये षड्विंशः पटलः॥
श्रीभैरव उवाच। अथ ते कवचं दिव्यं रम्यं मंत्रमयं परं। सर्वार्थसाधकं नाम वक्ष्ये हं शृ
णु पार्वति॥ कवचस्यास्य देवेशि दक्षिणामूर्त्तिको ऋषिः। पंक्तिः छंदो महादेवि त्रिकू
टा देवतेरिता। ऐं बीजं सौः स्तपाशक्तिः कामराजश्च कीलकं। धर्मार्थकाममोक्षार्थे विनियोगः प्रकी
र्तित। श्रीं शिरः पातु मे नित्यं श्रां नेत्रद्वितयं मम। इकलौं पातु मे नित्यं ईं गंडौ मे सदावतु। ऊं नासा
मे वताद्नित्यं ऊं मे श्रोष्ठौ सदावतु। ऋं मे नित्यं मुखं पातु कं मे कंठं सदावतु॥ लृं मे वक्षः सदा
वतु ऐं मे नाभिं सदावतु। ॐ मे वाम्यौ सदा पातु श्रों मे पृष्ठं सदावतु॥ श्रं शिश्नं पातु मे नि

३३

तं चः कटिं मेवतात्सदा कं खं गं घं ङं मे ऊरू चं छं जं झं ञं मेवतु जानू टं ठं डं ढं णं मे पातु जंघायु
गं सदा। तं थं दं धं नं मे गुल्फौ पं फं बं भं मं मेवतात्। पादौ सनखौ नित्यं सांगुलीकौ च सर्वतः
शिरसः पादपर्यंतं पादादिमस्तकांतकं। यं रं लं वं शं षं सं हं ळं क्षं मम वताद्वपुः। दिग्वि
दिक्षु सदा देवि सर्वदा पातु मां शिवे। महाश्रीषोडशी विद्या मातृकाक्षररूपिणी। इ
तीदं कवचं दिव्यं त्रिलोकेषु दुर्लभं। पठनाद्धारणात्सद्यो देवि सर्वार्थसाधनं। धृत्वा कु
र्यात्त्रिशीर्षे तु रतकाले जपं शिवे सर्वासिद्धिधुतोच्चलाविच्चरेद्भैरवो यथा। इदं रह
स्यं परमं गोप्यं सर्वार्थसाधकं। दातव्यं नान्यशिष्याय गोपयेत्साधकेश्वरी। इति रुद्र
यामले तंत्रे त्रिकूटारहस्ये सप्तविंशः पटलः॥ श्रीभैरव उवाच॥ अथ वक्ष्यामि देवेशि
कवचं मे रहस्यकं। सर्वसिद्धिप्रदं नाम सर्वदेवीमयं परं कवचस्यास्य देवेशि ऋषिस्याद्भै
रवेश्वरः। पंक्तिः छंदो महादेवि त्रिकूटा देवतेरिता। ऐं बीजं सौः शक्तिः क्लीं कीलकमुद्दा

रान· ३३

हृतं॥ अनिरुद्धकवितार्थे विनियोगः प्रकीर्तितः। हृदयाय नमः पातु शिरसो मे ललाटकं।
नेत्रे मे शिरसे स्वाहा सकर्णौ ववतात्सदा। शिखायै वषट् मां मे मुखं सरसनं सदा। कव
चाय हुं मव्यान्मे करौ सनखरौ सदा। नेत्रे श्रौ वषड्व्यान्मे हृदयं च सनाभिकं। अस्त्राय
फट् गुदं पातु मम नित्यं समेढ्रकं॥ अंगुष्ठाभ्यां नमः। पातु ऊरू मे सततं शिवे तर्जनी-
भ्यां नमः। पातु जानु मे सर्वदा तथा मध्यमाभ्यां नमः। पातु गुल्फयुग्मं मम नित्यं कनि-
ष्ठाभ्यां नमः। पातु पादयुग्मं मम नित्यं। करयोस्तलपृष्ठाभ्यां पातु मे सकलं वपुः। दिक्षु
न्तु मे तपाकाशे सर्वदा गहने गृहे। रणे राजकुले द्यूते षोडशाख्यासं सदावतु। इदं कवच
माख्यातं मंत्राणां मंत्रमुत्तमं। पवित्राधारये देहे देही मुक्तिपदं लभेत्। गुह्यातिगुह्यं क
वचं रहस्यं त्रिदिवौकसां। आनंदवर्धनं देवी गोपनीयं प्रयत्नतः। इति रुद्रयामले तंत्रे
त्रिकूटारहस्ये अष्टाविंशः पटलः॥ श्रीभैरव उवाच॥ अधुना देवि वक्ष्यामि कवचं दे

वदुर्लभं । वैरिनाशनिधं देवि सर्वतंत्रेषु गोपितं । वैरिनाशनिधस्यास्य कवचस्य ऋषिः
शिवः । पंक्तिश्छंदो महादेवि त्रिकूटा देवतेरिता । ऐं बीजं सौः स्तथा शक्तिः क्लीं कीलकमुदा-
हृतं । धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः ॥ ॐ बिंदुर्मे शिरः पातु त्रिकोणं पातु लो-
चने । वसुकोणं श्रुती पातु दिगस्रं वदनं मम । दिक्कोणं पातु मे कंठं मत्स्यं पातु वक्षसं ॥
हृत्तं ममावताधस्तो नाभिमष्टदलं ममः ॥ वत्सहृत्सदा पातु जानू षोडशपत्रकं । हृत्तत्र-
यं च मे पातु जंघायुग्मं महेश्वरि । भूमंदिरं सदा व्याप्ते पादौ सनखरौ शिवे । यंत्रराजस्त्रि-
कूटाया अवतादखिलं वपुः । इदं श्रीकवचं पुण्यं यः पठेद्धारयेद्धृदि तस्य विघ्नर्द्धिकिंन-
वीनवे सोपि धराहरिः ॥ इदं गुह्यतमं वर्म यंत्रराजप्रकाशकं दिव्यं गोप्यं परं पुण्यं गो-
पनीयं स्वयोनिवत् ॥ इति रुद्रयामले तंत्रे त्रिकूटारहस्ये एकोनत्रिंशः पटलः ॥ श्रीभै-
रव उवाच ॥ अथ ते कथयाम्यद्य कवचं परमाद्भुतं । गोप्यं विजयनामध्येयं श्रृणुत्वं नक्रि- राम. ३४

पूर्वकं देवि श्रीविजयाख्यस्य कवचस्यास्य भैरवो ॥ ऋषिः प्रोक्तो महादेवि ऐं बीजं शक्ति-
वाग्भवौ ॥ क्लीं कीलकं वियोगः स्याद्धर्मकामार्थमोक्षके ॥ लक्ष्मीबीजं शिरः पातु पराबीजं
च लोचने । मदनो वदनं पातु वाग्भवं कंदरौ तथा । शक्तिर्हस्तौ च मे पातु तार वक्षः सदावतु
भूतिः कुक्षिं सदा पातु कमला नाभिमंडलं ॥ वेधो बीजं तथा पृष्ठं लताबीजं च पार्श्वको ॥
धराबीजं पातु शिश्नं मोहबीजं गुदं सदा । मायाबीजं कटिं पातु कूटमाद्यं शिरोवतु ॥ कां-
तिबीजं मदो भूमेः शक्तिर्जानुयुगं सदा ॥ वेधो जंघायुगं पातु ह्वविगुल्फौ सदावतु ॥ ततो
बीजं पातु पादौ मायाबीजसमन्वितं । रणे राजकुले द्युते वने शावगृहे पथि ॥ रक्षेन्मां सत-
तं देवि द्वितीयं कूटमुत्तमं । दिग्विदिक्षु च मां पातु शक्तिबीजं महेश्वरि ॥ प्रभाते व्याह्रिरो
बीजं सायं माध्यातं बीजकं । निशीथे व्यासराबीजं सर्वकालं त्रिकूटजं ॥ कूटत्रयं शिवे
पातु संग्रामे मां शिवे ततः । रक्षो भूतपिशाचानां युद्धे दैत्यादि चौकसां ॥ इदं कवचमा-

यंतु यः पठेत्सर मेश्वरि। सर्वत्र विजयस्तस्य साधकस्य न संशयः॥ इदं गुप्ततमं वर्म मंत्रोद्धार
३५ प्रकाशकं। गोप्यं दिव्यं त्रिकूटाया गोपनीयं स्वयोनिवत्॥ इति श्री रुद्रयामले तंत्रे त्रिकूटा
रहस्ये त्रिंशः पटलः॥ श्रीभैरव उवाच॥ अधुना संप्रवक्ष्यामि कवचं देवतामयं। विषा
पहारकं परमं शृणु त्वं भक्तिपूर्वकं॥ देव्या विषापहारस्य कवचस्य ऋषिः शिवः॥ पंक्तिः छं
दो महादेवि त्रिकूटा देवतेरिता॥ ह्रीं बीजं सोऽस्य शक्तिः क्लीं कीलकमुदाहृतं॥ धर्मार्थ
काममोक्षार्थे विनियोगस्तु धारणे॥ पातु कामेश्वरी नित्या नित्यं मम शिरः सदा॥ नेत्रे
मे पातु सततं नित्या श्री भगमालिनी॥ कर्णौ मे नित्यक्लिन्ना व्याद्भेरुंडा व्याच्च नासिका
श्री वह्निवासिनि नित्या मे पातु मे वदनं सदा॥ महाविद्येश्वरी नित्या कंठं पायात्सदा मम॥
शिवदूती तु जौ पातु त्वरिता चात्र कौ मम॥ श्री कुलसुंदरी नित्यं पातु मे हृदयं परं॥ नि राम. ३५
त्या नित्या सदा पातु मे नाभिं मम हे श्वरि॥ नित्या नीलपताका च पातु मे शिश्नमीश्वरी

पातु मे विजया नित्या जानुयुग्मं सदा शिवे॥ श्री सर्वमंगला नित्या जानुयुग्मं सदा शिवे॥ ज्वाला
मालावती सा दीम म नित्या मदां तिका॥ शिरसः पादपर्यंतं पादादि मस्तकांतकं॥ चित्रा नित्या
सदा पातु सर्वदा मे खिलं वपुः॥ पूर्वादि दिक्षु सततं धरणौ दिवि द्रावयोतेव नेदहनचौरन्न
येगजे च॥ सिंहे जलेरणे तु विस्मृत पादपीठं देव्या वपुर्भव पुविद्या तोपि पायात्॥ इती
दं कवचं देव्या दिव्यं श्री देवतामयं॥ पठेद्वा धारयेन्मूर्ध्नि विषभीतिर्न जायते॥ सर्वदद्दर
स्य देवेशि विषग्रस्तस्य वा शिवे॥ बध्वा कवचराजेशं विषमुक्तिर्भवेत्क्षणात्॥ विषापहा
रकं कवचं दिव्यं दुर्लभमुत्तमं॥ अप्रकाश्यं महादेवि कदाचिन्न प्रकाशयेत्॥ इति श्री रुद्रया
मले तंत्रे त्रिकूटा रहस्ये एकत्रिंशः पटलः॥ श्री भैरव उवाच॥ अधुना शृणु देवेशि कपालि
न्या मि विस्तरं॥ शक्ति साधनकं नाम कवचं परमाद्भुतं॥ मुक्ति साधनकस्यास्य कवचस्य म
हेश्वरि॥ ऋषिः सदाशिवः ख्यातः पंक्तिश्छंद उदाहृतं॥ त्रिकूटा देवता प्रोक्ता वाग्भवं बीज

रुच्यते। शक्तिर्बीजं च शक्तिस्या कामराजश्च कीलकं। धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः
श्रीं क्लीं लीं ऐं सौः। ॐ ह्रीं श्रीं पातु मे त्रिपुरा शिरः॥ त्रिकूटा पातु मे नेत्रे वेधछविशारदयुता। त्रिवर्णा पा
३६ तु मे कर्णौ सौः ऐं क्लीं ह्रीं श्रीं नृपिताः॥ अनंगकुसुमा देवि पातु ह्रीं श्रीं च नासिकां। ॐ श्रीं मुखं स
दा सोऽह मनंगमदनावतु॥ कंठं मे नगरेखाप्या स्कंधौ मेनंगवेगिनी। भुजौ मेनंगकुशाच्या
द्धनौ मेनंगमालिनी। सर्वसंक्षोभिणी शक्तिः पातु वक्षःस्थलं मम। सर्वविद्राविणी शक्तिः कुक्षिं
पातु मम नित्यशः। श्री सर्वाकर्षिणी शक्तिः पृष्ठं पातु सदा मम। पार्श्वौ मे पातु सततं सर्वाह्ला
दनकारिणी॥ सर्वसंमोहिनी शक्तिर्नाभिं पातु सदा मम। शिश्नं मे पातु सततं सर्वस्तंभन
कारिणी। श्री सर्वजृंभिणी शक्तिर्गुह्यं मम सदावतु। सर्ववशंकरी शक्तिः कटिं पातु सदा म
मः। श्री सर्वरंजिनी शक्तिरूरू मे पातु नित्यशः। जानू मे पातु सततं सर्वसंपत्प्रपूरिणी॥ राम
शिरसः पादपर्यंतं॥ पादादि मस्तकांतकं। सर्वमंत्रमयी शक्तिः पातु मे सकलं वपुः। रणे ३६

रण्ये राजनये द्यूते चौरगजादिषु। पायान्मां सततं शक्तिः सर्वद्वंद्वक्षयंकरी। सर्वसिद्धिप्रदा यातु
पूर्वस्यां दिशि मां सदा॥ आग्नेय्यां पातु मां नित्यं सर्वसंपत्प्रदा ततः। सर्वप्रियंकरी देवी दक्षिणे
पातु मां सदा। नैरृत्यां पातु मां देवी सर्वमंगलकारिणी॥ पश्चिमे तु महादेवी सर्वकामप्रदावतु। वायव्यां मां सदा पातु सर्वदुःखविमोचिनी। सर्वमृत्युप्रशमिनी चोत्तरे पातु मां सदा। ऐशा
न्यां पातु मां देवी सर्वविघ्ननिवारिणी सर्वांगसुंदरी देवी मामूर्ध्वं पातु नित्यशः। अधस्तात्पातु
मां देवि सर्वसौभाग्यदायिनी। सर्वज्ञा मां प्रजातेव्यान्मध्ये सर्वशक्तिका। सर्वैश्वर्यप्रदा सा
ये पातु मां नैरवेश्वरी॥ सर्वज्ञानमयी देवी निशीथे मां सदावतु॥ ब्राह्मे मुहूर्ते त्रिके पातु सर्वदुःख
विमोचनी॥ सर्वकाले महादेवि पातु मां त्रिपुरेश्वरी। सर्वाधारस्वरूपाव्याद्रणे राजभयाच्च मां
सर्वपापहरा पातु वह्निचोरभयात्तमः॥ सर्वानंदमयी पातु छूतपोताद्युपद्रवात्॥ श्मशाना
रण्यसिंहादिभयश्वापदनीतितः। पायान्मां सततं देवी सर्वरक्षास्वरूपिणी। पुत्रान्दारान्धनं गे

२७ इमित्रापि बांधवांस्तथा॥ पातु मां ॐ श्रीं क्रीं क्लीं सर्वेप्सितफलप्रदा॥ इतीदं कवचं दिव्यं देवी पूजा
नयं परं मंत्ररूपं शिवे गुह्यं नवमुद्राप्रकाशकं॥ अमाद्यशसिद्धिशांत्रिकूटायारहस्यकं॥
सर्वस्वं षोडशाक्षर्याः कवचं षोडशात्मकं॥ यः पठेद्धरात्रे तु शक्तियुक्तो महेश्वरि॥ स नवे त्रि
पुरापुत्रः सर्वतंत्रेषु दीक्षितः॥ शक्त्यादिक्षितया युक्तो मांत्रिको मंत्रसाधकः॥ पठेद्रात्रौ त्रि
कूटाया कवचानि च षोडश॥ शक्त्या सहचरे ज्ञागंर तेसा तर्पयेच्छिवं॥ प्रादुर्भविष्यति स्व
त्वा सद्यस्त्रिपुरसुंदरी॥ तस्माद्देवि स्वकांताये दीक्षां दत्वा विधानवित॥ साधकः साधकश
क्त्या सहितः परमेश्वरी॥ पठेत्त्रिपुरसुंदर्याः कवचानि च षोडश॥ रवौ भूर्जत्वचि स्नात्वा
त्रिकूटां षोडशाक्षरीं॥ कुंकुमेनाष्टगंधेन कवचानि च षोडश॥ लिखित्वा वेष्टयेत्सीतसूत्रेण राम.
सूरसुंदरी॥ रक्तपालाक्षया वेष्ट्य सुवर्णेनापवेष्टयेत॥ पंचगव्येन तां स्नात्वा यथोक्तवि २७
धिनार्चयेत्॥ गुटिके त्रिमहाविद्याधारयेत्साधकोत्तमः॥ पुरुषो दक्षिणे बाहौ योषिद्वाम

करे ततः॥ किं किं न लभते कामं मुक्तिस्तस्य करे स्थिता॥ वंध्या वा काकवंध्या वा मृतवत्सा च का
मिनी॥ रजस्वला चतुर्थेह्नि धारयेद्धृदयोपरि॥ पुत्रान्वै चिरायुषो देवि लभते नात्र संशयः॥
श्मशाने यः पठेन्मंत्री कवचानि च षोडश॥ मारयेदखिलान्शत्रून्वशयेद्भुवनत्रयं॥ आ
कर्षयाति सर्वांमाः स्तंभयेद्वायुनास्करौ मोहयेत्त्रिजगद्देवि साधको मंत्रसाधकः॥ मुक्तिसाध
नकं नाम कवचं साधकेश्वरी॥ योषिद्विशेषतो तुर्तुराज्ञया सततं पठेत॥ धारयित्वा जित्वा दौ
सान्नवे सोडशीस्वयं॥ स्वयं मंत्री शिवो भूत्वा चतत्लीया॥ शिवशक्तिमयं रूपं नवे लकवचधा
रणात्॥ इदं कवचमीशानि दिव्यं मंत्रमयं परं॥ मुक्तिसाधनकं नाम गोपनीयं स्वयोनिव
त्॥ इति श्रीतंत्रराजोयं सर्वतंत्रेषु गोपितः॥ श्रीत्रिकूटरहस्याख्यः सर्वमंत्रनिधिः परं
गोपनीया ति गुह्यायं त्रिकूटायारहस्यकं॥ इदं सारं हितं त्राणं श्रीविद्यानिर्णयाकितं
द्वात्रिंशसटलैर्युक्तं देवीरूपं विचिंतयेत॥ यत्कुह्योवर्त्तते देवितंत्रराजो महेश्वरि॥ न तत्र देवी

दुर्भिक्षं नदारिद्र्यकदाचनः। मरीनयंततत्रास्ति वह्निचौराद्युपद्रवः। तत्रैववसतेलक्ष्मीःप
३८ रिपूर्णापिनिश्चला। त्रिकूटावसतेतत्रयत्रतंत्रेदमीश्वरी॥ पूजयेद्देवितंत्रेशंरक्तपुष्पैर्वि
शेषतः। गंधाक्षतप्रसूनाद्यैर्धूपदीपादितर्पणैः॥ बलिंदद्यान्महेशानिसाधकःसर्वा
सिद्धये। गोदानस्वर्णदानंचरूप्यदानंतथैवच। दत्वादेवित्रिकूटेयंसाधकस्यहिसि
ध्यति॥ तद्गृहंचनवेसूर्णंधनधान्यविभूतिभिः। गोमहिष्यादिभिर्देविगजाश्वपरिपूरि
तं। तद्गृहंदेवतातुल्यंयत्रतंत्रोयमीश्वरी॥ श्रीदेव्युवाच॥ भगवद्वकरुणांभोधेसर्व
तंत्रैकपारगः॥ कीतास्मिन्नवतानेनकपनेनमहेश्वर॥ श्रीदेव्याःषोडशाक्षर्यास्तं
त्रराजस्यधूर्जटे॥ विद्यांश्चलामहानंदोजातोमेत्रिपुरांतक॥ भैरवउवाच॥ ॥त्रिकू राम·
टायारहस्याख्यंतंत्रमंत्रैकसागरं। अदातव्यमनक्रायकुचैलायदुरात्मने। धूर्ता ३८
यबुद्धिहीनायदिक्षाहीनायपार्वति॥ अकुलायतिदंकायहीनायगुरुवध्या। स्व

पुत्रापापितंत्रेशंदत्वाकुष्ठीभवेन्नवेत्॥ कलौइदंरहस्यंपरमंत्वत्कृपातवमयोदितं॥
सर्वस्वंमेशिवेतंत्रंगोपनीयंस्वयोनिवत्॥ ॥इतिरुद्रयामलेतंत्रेत्रिकूटारहस्येमुक्ति
साधनकवचाख्यानंद्वात्रिंशःपटलःसमाप्तोयं॥ ॥श्रीषोडशाक्षर्यास्त्रिपुरसुंदर्यास्त्रिकूटा
रहस्याख्यस्तंत्रराजः॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥लेखपाठकयोःशुभंभवतु॥ ॥
यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥ यदिशुद्धमशुद्धंवाममदोषोनदीयते॥१॥ ॥ ॥
॥ल ॥श्रीजयोस्तु॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

३५

राम॰
३५